कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

श्रीगणेशाय नमः ॥ शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते ॥ स च क्वचिद्भेदः [illegible] विषयविषयिभावादिः × क्वचि
दभेदः तदतिरिक्त एव [illegible] आधाराधेयभावादियोग्यतयोगि ॥ अभेदश्च प्रातिपदिकार्थयोः समानविभक्तिकेनाव्यवहितपूर्ववर्तिना च नामपदेनोप
स्थापितस्यैव संसर्गमर्यादया भासते ॥ यथा घटो नीलो नीलघटमानयेत्यादौ घटादौ नीलादेः ॥ ननु विरुद्धविभक्तिमत्पदार्थस्य नीलस्य घटे इत्या
दौ नीलघटाभेदान्वयबोधस्य सर्वानुभवविरुद्धत्वात् ॥ स्वसमानविभक्तिकत्वं च स्वप्रकृतिकविभक्तिसजातीयविभक्तिकत्वम् ॥ साजात्यं च
विभक्तिविभाजकप्रथमात्वादिना ॥ ननु समानानुपूर्वीकत्वं साजात्यम् वेदाः प्रमाणं शतं ब्राह्मणाः इत्यादावन्वयबोधानुपपत्तेः ननु विंश
त्याद्याः सदैकत्वे इत्यनुशासनात् शतं ब्राह्मणा इत्यादेः साधुत्वेऽपि वेदाः प्रमाणमित्यादयः कथं प्रयोगाः विशेष्यविशेषणवाचकपदयोरस
ति विशेषानुशासने समानवचनकत्वनियमात् ॥ अन्यथा घटा नील इत्यादेरपि साधुताप्रसंगात् ॥ समानलिंगकस्थले तथा नियमोपगमेन
वेदाः प्रमाणमित्यादेः साधुत्वोपपादनेऽपि इति हेतुस्तदुद्भवे इति कारिकायां इति त्रयः समुदिता हेतुरिति काव्यप्रकाशव्याख्यासंगतिर्दुर्वारे
ष । एवं असमानलिंगकस्थले विशेष्यवाचकपदासमानवचनकस्यापि विशेषणपदस्य साधुत्वे तादृशस्थले औत्सर्गिकं एकवचनमेव
सर्वत्र विशेषणपदोत्तरं प्रयोक्तुमुचितमिति प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि पितरौ देवता इत्यादेरनुपपत्तिः मैवम् ॥ यत्र विशे

शक्तिर्निपुणता लोककाव्यशास्त्राद्यवेक्षणात् काव्यज्ञशिक्षयाभ्यासात्

Acc. No. ~~2028~~ M-1735
Title - व्युत्पत्तिवाद
Author - गदाधर
Date - ?
Sub - न्याय
folio - 25
xerox - 50.

K.K.S.U. LIBRARY
RAMTEK
441 106
M-1735
Dist. Nagpur

Checked 2012

व्यु॰वा॰ ष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्या .. विरुद्धसंख्यायाः अविवक्षितत्वं तत्र विशेष्यविशेषणपदयोः समानवचनत्वनियमः अतएव पुरूरवो
माद्रवसो विश्वेदेवा इत्यादौ द्वित्वविशिष्टयोः पुरूरवोमाद्रवसोरित्येतयोः विशेषणतयाविवक्षितत्वात् ॥ तद्वाचकपदस्य द्विवचनान्तता ॥ वेदाः प्रमा
१ णमित्यत्र च विशेषणपदोत्तरविभक्त्यर्थस्य अविरुद्धमेकत्वं विवक्षितं तच्च प्रकृत्यर्थतावच्छेदकप्रमितिकरणत्वेन्वेति ॥ शाब्दप्रमाकरणत्वं च श
ब्दत्वावच्छिन्नयावद्व्यक्तिनिष्ठं एकमेवेति नायोग्यता ॥ न च पदार्थः पदार्थेनान्वेतीतिव्युत्पत्तिविरोधः ॥ संपन्नो व्रीहिरित्यनेकव्रीहितात्पर्यकेप्येकव
चनदर्शनेन तादृशव्युत्पत्तिसंकोचस्यावश्यकत्वात् । यदि चात्र स्वाश्रयप्रकृत्यर्थतावच्छेदकत्वसंबंधेन प्रकृत्यर्थ एवैकत्वान्वयः ॥ व्रीहित्वादिजा
तेः स्वरूपत एव व्रीह्यादिपदशक्यतावच्छेदकतयान्वयितावच्छेदकरूपेणानुपस्थितेः तत्र पदार्थांतरस्यान्वयानुपपत्तेरिति मन्यते ॥ तदा प्रकृते
पीदृश्येव गतिः ॥ यत्तु संपन्नो व्रीहिरित्यादौ एकवचनोपस्थितानि नानैकत्वानि प्रत्येकं नाना व्रीहिष्वन्वीयंते इत्येवं सामंजस्ये जाते एकत्वभानो ३
पगमो निरर्थक इति तदसत् । यतः स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूपस्य स्वसजातीयद्वितीयरहितत्वमेकवचनार्थः ॥ न त्वेकत्वमा
त्रम् तस्य वस्तुमात्रसाधारण्येनार्थत एव लाभात् अनुपयोगाच्च ॥ अतएव पशुना यजेतेत्यादौ पशुनिष्ठतादृशैकत्वस्य विवक्षितत्वात् ॥ अ
नेकपशुकरणकयागान्नादृष्टसिद्धिः ॥ साजात्यं च स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकरूपेण । अतोत्र घटोस्तीत्या

दौघटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वाप्रसिद्धावपिनक्षतिः॥ एतद्देशविद्यमानघटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वस्यैवतत्रबोधात्॥ तस्यचप्र
सिद्धत्वात्॥ एतद्देशेबहुघटसत्वदशायांतादृशवाक्यप्रयोगश्चजात्येकत्वादेरेवसमर्थनीयः॥ मत्वैकत्वाविवक्षायामपिभावाख्यातस्थलेएकवचनस्यसाधुत
दर्शनात्संख्यायाअविवक्षणेऽपिसुप भोश्रीहिरित्यादावेकवचनोपपत्तेरलंजात्येकत्वपरतयातत्समर्थनेनेतितदप्यकिंचित्करम्॥ भावाख्यातस्थलेगत्यंतर
विरहेणविभक्तेर्निरर्थकत्वोपगमात्॥ अत्रचसार्थकत्वोपगमसंभवेतत्परित्यागस्यानुचितत्वात्॥ सतितात्पर्येतद्बोधस्यानुभाविकत्वाच्चेति॥ एवंत्रयःसमु
दितौइत्यत्रहेतुपदकार्यत्वादप्रयोजकतावच्छेदकसमुदायत्वावच्छिन्नपरंतादृशसमुदायत्वान्वितमेकत्वमेकवचनार्थः॥ अतएवशास्त्यादीनांत्रयाणांतृणार
× हेतुः × णिमणिन्यायेनहेतुत्वशंकानिरासः॥ तथासत्येषामेकैकसमवधानदशायामपिकार्योत्पत्तेरावश्यकतयातत्त्रितयपर्याप्तसमुदायत्वस्यकार्योत्प
त्तिप्रयोजकतानवच्छेदकतयातेषांत्रयाणांतथाविधैकसमुदायत्वाश्रयत्वानुपपत्तिः॥ एवंजात्याकृतिव्यक्तयःपदार्थइत्यत्रत्रितयनिष्ठस्यपदशक्तिरूपपदार्थ
त्वस्यैकत्वंविवक्षितमितितत्रविशेष्यपदस्यबहुवचनांतत्वेऽपिविशेषणपदस्यैकवचनांततोपपत्तिः॥ प्रत्यक्षानुमानेत्यादिसूत्रेप्रमाकरणत्वरूपप्रकृत्यर्थता
वच्छेदकस्यप्रत्यक्षानुमानादिनिष्ठस्यैकतयाबाधितत्वेनप्रमाणपदस्यबहुवचनांततेति एवंपितरोदेवताइत्यत्रापिपितृपितामहादीनांएकरूपेणदेवतात्व
विरहेणपितृत्वपितामहत्वादिनापृथगेवयागोद्देश्यत्वरूपदेवतात्वात्॥ उद्देश्यतावच्छेदकभेदेनैवोद्देश्यताभेदात्॥ एकत्वस्याविवक्षयादेवतापदस्यबहुवचनां

3

व्यु०त०वा० ततेति दिक्॥ स्वप्रकृतिकत्वेन च स्वाव्यवहितोत्तरत्वेन प्रतिसंधीयमानत्वं॥ तेन दधि सुंदरमित्यादौ विशेष्यपदानंतरं विभक्तेरसत्वेपि न क्षतिः॥ तत्र विभक्तेरनुसंधानं
विनाशाब्दबोधानभ्युपगमात्॥ एवं तादृशविभक्तिसजातीयविभक्तिकत्वमपि तथाविधविभक्त्यव्यवहितपूर्ववर्तितया प्रतिसंधीयमानत्वं तेनेदं दधीत्यादौ वि
२ शेषणपदानंतरं विभक्तेरसत्वेपि न क्षतिः॥ अथ नीलस्य घट इत्यादावपि पदार्थोपस्थित्यादिकारणसमवधानसंभवात् कथं न नीलघटाद्योरभेदान्वयबोध इति
चेत् तथाविधान्वयबोधौपयिकाकांक्षाविरहात्॥ तथाहि॥ तादृशान्वयबोधे प्रथमाविभक्त्यंतघटादिपदसमभिव्याहृतप्रथमांतनीलादिपदत्वमेव॥ असम
स्तनीलघटपदाद्याकांक्षा समासस्थले च घटपदाव्यवहितपूर्ववर्तिनीलपदत्वं नीलादिपदाव्यवहितोत्तरवर्तिघटादिपदत्वं वाकांक्षा॥ उक्तस्थले च तादृश्या एक
स्या अपि आकांक्षाया विरहान्नापत्तिः॥ कार्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशात् नोक्ताकांक्षाज्ञानयोः परस्परबोधे व्यभिचारः॥ यत्तु समाससाधार
णं विशेषणपदस्य विशेष्यवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वस्वरूपं विरुद्धविभक्तिराहित्यमेव तादृशान्वयबोधौपयिकाकांक्षा॥ विशेष्यवाचकपदनिष्ठ
विशेषणवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वं च न तथा॥ नीलघटमानयेत्यादावसंभवादिति तदसत्॥ विशेष्यवाचकपदाप्रकृतिकत्वस्य तादृशपदानुत्त २
रत्वस्य तदुत्तरत्वेनाप्रतिसंधीयमानत्वरूपस्य वा नीलो घट इत्यादौ नीलादिपदसमव्याहृतविभक्तौ घटपदसमभिव्याहृतविभक्तिभिन्नायां सत्वात्॥ अ
थ विशेष्यवाचकपदोत्तरावृत्तिविभक्तिविभाजकधर्मवद्विभक्तिराहित्यस्य विवक्षणान्न दोष इति चेत् तर्हि विभक्तित्वादिकमजानतः पुरुषस्य तादृशधर्मज्ञा

णासंभवात्तथाशाब्दबोधानुपपत्तिः॥ नीलो घट इत्यादौ सुपदस्याप्रयोजकत्वभ्रमदशायां तादृशशाब्दबोधस्यानुदयात्॥ नीलस्य घट इत्यादावपि षष्ठ्यादेः सत्त्वादिभ्र
मदशायां शाब्दबोधोत्पत्त्या स्वरूपतो विरुद्धविभक्तिराहित्यस्याप्रयोजकत्वात्॥ अथ नीलोपपदे नील घट इत्यादिद्विविधबोधसाधारणस्योत्तरत्वादिभिन्नपदा
नुगतत्वविशिष्टस्योत्तरत्वादिरूपस्याव्यवहितोत्तरत्वसंबंधेन नीलादिपदवत्त्वाद्यंतघटादिपदत्वमेव तथास्त्विति चेन्न॥ नीलघटरूपमित्यादिवाक्यसा
धारण्यानुरोधेनान्यादृश्याकांक्षाया उपगंतव्यतया उपदर्शितव्याससमाससाधारणानुगताकांक्षानुसरणस्याप्रयोजकत्वात्॥ अथ नीलं घटमानयेत्या
दौ नीलादेर्घटादावन्वयोपगमे नीलादिपदोत्तरविभक्त्यर्थस्य कर्मत्वादेः कुत्रान्वय इति चेन्न कुत्रापि विभक्तेः पदसाधुत्वार्थमेव प्रयुज्यते अभेद एव वा
विशेषणविभक्तेरर्थः॥ अभेदस्य संसर्गतया भानं तु समासस्थल एव तत्र लुप्तविभक्त्यनुसंधानं विनापि शाब्दबुद्धेरानुभाविकत्वादित्यपि वदंति॥ अथै
तन्मते अभेदश्चेद्भेदत्वावच्छिन्नाभावः तस्याप्रसिद्धिः॥ यदि च भेदप्रतियोगिकाभावः तदा नीलं जलमित्यादिवाक्यस्य प्रामाण्यापत्तिः॥ जले हि ला
दिना नीलभेदाद्यभावसत्त्वात्॥ नीलभेदत्वाद्यवच्छिन्नाभावस्य विभक्त्यर्थत्वे नीलादिपदार्थानन्वयप्रसंगः॥ न च भेदप्रतियोगिकाभाव एव विभक्त्यर्थः नीला
दिपदसमभिव्याहारान्नीलभेदत्वावच्छिन्नाभावः प्रतीयत इति वाच्यम्॥ पदार्थद्वयसंसर्गभानस्यैवाकांक्षानियम्यत्वात्॥ नीलभेदत्वावच्छिन्नप्रतियोगि
तांतर्भावेन वृत्तिं विना भेदरूपपदार्थतावच्छेदकस्याभावे तादृशसंबंधभानासंभवात् मैवम्॥ भेदोऽभावश्च विशेषणविभक्तेरर्थः॥ विशिष्टलाभस्त्वाकां

5

न्यु० वा०

क्षादिवशात्॥ एतेनभेदेनीलादिपदार्थान्वयेएकदेशान्वयप्रसंगइत्यपिनिरस्तम्॥ नचविशेषणविभक्तेरभेदार्थकत्वेनीलंघटइत्यादावपिअभेदान्वयबोधापत्तिः॥ धान्येनधनवानित्यादौतृतीयायाअभेदबोधनात्॥ अभेदप्रकारकबोधेविरुद्धविभक्तिराहित्यानपेक्षणादितिवाच्यम्॥ द्वितीयादिनाअभेदबोधेद्वितीयाद्यंतविशेष्यवाचकपदसमभिव्याहारस्यप्रयोजकत्वाभ्युपगमात्॥ अथप्रमेयोघटइत्यादौप्रमेयत्वावच्छिन्नभेदाप्रसिद्ध्यालघुधर्मसमनि २ यतगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे [illegible] कंबुग्रीवादिमान्घटइत्यादावपिकंबुग्रीवादिमत्त्वावच्छिन्नभेदाप्रसिध्याविशेषणविभक्तेरभेदार्थकत्वासंभवः॥ एवंनीलपर्यायपरनीलादिपदघटितस्यनीलोघटइत्यादिवाक्यस्यापिप्रामाण्यापत्तिः॥ नीलत्वादिनाभेदाभावस्यनीलघटादौसत्त्वात्॥ एतेनविशेषणतावच्छेदकीभूतनीलत्वप्रमेयत्वादिकमेवविशेषणविभक्तेरर्थः॥ नीलत्वादेर्नीलत्वाद्यवच्छिन्नभेदाभावरूपतयाअभेदार्थकत्वेवाद्योपपत्तिरितिपरास्तम्॥ नीलत्वादौनीलत्वादिमतःस्ववृत्तित्वसंबंधेनान्वयेआकांक्षाविरहाच्च॥ यथाहितद्विशि २ ष्टेअधिकरणेअधिकरणतयातदन्वयोअनुभवविरुद्धस्तथातद्धर्मेआधेयतयातद्धर्मवदन्वयोपि॥ अतएवचैत्रःकर्मगच्छतीत्यादिवाक्यस्यनिराकांक्षता॥ नचैवंसंसर्गतामतेपिनिस्तारः॥ नीलोघटइत्यादौस्ववृत्तिनीलत्वादेः^स्वस्मिन्नेवसंबंधत्वोपगमेन^संसर्गतास्वीकारेउक्तस्थलेऽप्रामाण्यापत्तेर्दुर्वारत्वादितिवाच्यम्॥ स्ववृत्तिनीलत्वादेः^पटादिवृत्तिनीलत्वादेर्घटादौपटादिसंबंधताविरहेणतादृशातिप्रसंगाभावात्॥ वस्तुतस्तुतत्तद्व्यक्ति

दंडवान् दंडवान् मतुबर्थः अविवक्षितः

तावछिन्नभेदाभावएवनीलत्वादिप्रकारेणभासमानानांतत्तद्व्यक्तीनांस्वस्मिन्संबंधतयाभासतइतिनकाप्यनुपपत्तिः॥संबंधताचतत्तद्भेदप्रतियोगिकाभावत्वेनतत्तद्व्यक्तिभेदप्रतियोगिकाभावत्वेनवेत्यन्यदेतत्॥नचैवंविशेषणविभक्तेरभेदार्थकत्वमतेपितत्तद्व्यक्तित्वावछिन्नभेदएवविभक्त्यर्थौवक्तव्यइतिवाच्यम्॥तथासत्यपूर्वव्यक्तिनिष्ठतत्तद्व्यक्तित्वस्यकथंचिदपिभानासंभवेनतदवछिन्नभेदाभावेशक्तिग्रहासंभवेनाएवंव्यक्तीनामभेदान्वयबोधानुपपत्तेः॥संसर्गज्ञानस्यविशिष्टबुद्ध्यावहेतुत्वेनानुपस्थितस्यापिसंसर्गतयाभानसंभवेसंसर्गतामतेनुपपत्त्यभावात्॥नचविभक्त्यर्थेविभेदेतत्तद्व्यक्तित्वावछिन्नप्रतियोगिताकत्वसंबंधेनैवनीलत्वादिनातत्तद्व्यक्तीनामन्वयः॥तादृशभेदानामपितत्तद्व्यक्तिभेदत्वावछिन्नप्रतियोगिताकत्वसंबंधेनैवाभावेअन्वयउपपद्यते॥तावतैवतत्तद्व्यक्तित्वावछिन्नाभेदलाभइतिनकाप्यनुपपत्तिरितिवाच्यम्॥प्रतियोगिविशेषिताभावबुद्धेश्चस्वप्रतियोगिप्रकारीभूतधर्मवैशिष्ट्यवैशिष्ट्यावगाहितयानीलत्वादिनानीलादिविशेषिताभावेनीलत्वाद्यवछिन्नप्रतियोगितारूपनीलत्वादिविशिष्टनिरूपितवैशिष्ट्यस्यैवभानात्॥विशेषणतावछेदकावछिन्नायाएवप्रतियोगितायाअभावेप्रतियोगिनःसंबंधतयाभानात्॥अन्यथावि

ता शिष्टवैशिष्ट्यबोधेऽनुपपत्तेः॥प्रतियोगिविशेषिताभावज्ञानंतुविशिष्टवैशिष्ट्यबोधमर्यादांनातिशेतइतिदर्शनात्केवलेविशेष्येविशेषणमितिरीत्यानकश्चिदप्युपैतीतिचेत्सत्यम्॥अभेदस्तादात्म्यं तच्चस्वत्वसाधारणोधर्मः॥असाधारण्यंचैकमात्रवृत्तित्वं तच्चस्वसामानाधिकरण्यस्व

7

व्यु॰ वा॰ प्रतियोगिवृत्तित्वोभयसंबंधेन भेदविशिष्टं यत्तदन्यत्वं तद्वृत्येकमात्रवृत्तिधर्मत्वं एवं विशेषणविभक्तेरर्थः॥ वृत्तिश्चात्र प्रकारत्वार्थस्य संसर्गमर्यादया भासते ताद्दशस्वध-
र्मत्वात्तद्घटितत्वादिकमपि एवं॥ अपर्वव्यक्तिनिष्ठस्य ताद्दशधर्मस्य विशिष्य ज्ञातुमशक्यत्वेपि एकमात्रवृत्तिधर्मत्वादिना सामान्यप्र सासत्त्वास्फुरत्वमेव॥
४ अभेदस्य संसर्गतामतेपि एतादृशानुगताभेदस्यैव तथात्वमुचितम्॥ तत्र तद्व्यक्तित्वावच्छिन्नभेदाभावकूटस्य विशिष्य तथात्वे घटो न नील इत्यादिवाक्यजन्य-
बोधे प्रतियोग्यभावान्वयोस्तुल्ययोगक्षेमावितिन्यायेन ताद्दशाननुगतसंबंधावच्छिन्नप्रतियोगिताकाननुगताभावा एव भासेरन्॥ ननु नीलादिवृत्ति-
प्रतियोगिताकैकोभावः॥ तथा सति यत्किंचित्ताद्दशाभावतात्पर्येण प्रयुक्तस्य नीलेपि न नील इत्यादिवाक्यस्य प्रामाण्यं स्यात्॥ इदं तु बोध्यम्॥ विशेष-
णविभक्तेरभेदार्थत्वे घटो न नील इत्यादौ नञा नीलाद्यभेदाभाव एव प्रत्येष्यते न तु नीलादिभेदः॥ याद्दशसमभिव्याहारस्थले येन संबंधेन यत्र धर्मि-
णि येन रूपेण तद्वत्त्वं नञा सत्वे प्रतीयते ताद्दशस्थले नञा तत्र धर्मिणि ताद्दशसंबंधावच्छिन्नताद्दशधर्मावच्छिन्नप्रतियोगिताकाभावबोधस्य व्युत्पत्तिसि-
द्धत्वात्॥ प्रतियोग्यभावान्वयावित्यादेरप्ययमेवार्थः॥ एवं च नञोभेदबोधकत्वं कुत्रापि न संभवति। अनीलघटमानयेत्यादौ घटपदसामानाधि- ४
करण्यानुरोधेनानीलपदस्य नीलभिन्नपरतया नञोभेदवत्त्वे लक्षणाया उपगंतव्यत्वात्॥ इदं त्वत्रावधेयम्॥ अभेदस्य प्रकारतामतेपि
घटो न नील इत्यादिवाक्यस्य नीलाभेदाभावबोधकत्वेपि तत्तृतीयाभावस्य प्रतियोगिस्वरूपतया नञोभेदबोधकत्वं नानुपपन्नं परं तु भेदत्वप्रका- राम॥

8

रेण बोधो भवतीति न वैल्यन्यदेतत्॥ इदं तु तत्त्वं। असमासस्थले अभेदस्य संसर्गतोपगमेपि गौरवविरहात्॥ तत्र विशेषणविभक्तेरिति कल्पनमनुचितम्
न चाभेदे यत्र विशेषणविभक्तेः शक्तिभ्रमः स्वारसिकलक्षणाग्रहो वा तत्र सर्वमत एवाभेदप्रकारकबोधस्य नीलो घट इत्यादिवाक्यादुत्पत्त्या तादृ
शसमभिव्याहारज्ञानस्य द्विविधबोधे हेतुताद्वयं कल्पनीयम्। अभेदस्य संसर्गतावादिने तु गौरवम्॥ एवं तादृशसमभिव्याहारज्ञानघटितसाम
ग्र्याः भिन्नाभिन्नयोग्यताज्ञानघटिततया द्वैविध्येन भिन्नविषयकप्रत्यक्षादिकं प्रति तादृशशाब्दसामग्रीप्रतिबंधकताया अप्याधिक्यमिति वाच्यं
अभेदस्य संसर्गतावादिनोक्तस्थलेपि तत्संसर्गकबोधस्यैवोपगमादितिदिक्॥ स्तोकं पचति मृदु पचतीत्यादौ विरुद्धविभक्तत्ववत्त्वरूपदोषोपस्था
पितस्यापि स्तोकमृद्वादेर्धात्वर्थपाकादावभेदान्वयो युक्त इति सिद्धः। तदन्वयबोधे च द्वितीयांतैर्धातुपदसमभिव्याहारस्यापि अभेदान्वयबोधौ
पयिकाकांक्षात्वमुपगम्यते॥ क्रियाविशेषणस्थले च न द्वितीयातिरिक्तविभक्तिरुत्पद्यते ×१८× ॥ क्रियाविशेषणानां कर्मत्वमित्यनुशासनेन
तत्र कर्मत्वातिदेशात्॥ न चैवं स्तोकः पाक इत्यादावपि द्वितीयाप्रसंगः॥ तत्रापि स्तोकादेः क्रियायामेव विशेषणत्वात्॥ भावकृतां प्रयोगसाधु
त्वमात्रार्थकतया धातुनैव तत्र पाकादिप्रतिपादनात् इति वाच्यम्॥ क्रियापदस्य तत्र सार्थकप्रत्ययात धातूपस्थाप्यार्थपरत्वात्॥ स्तोकं स्थी
यत इत्यादावाख्यातस्यापि वर्तमानत्वाद्यर्थकतया सार्थकत्वात्॥ न च वर्तमानत्वाद्यविवक्षायां द्वितीयानुपपत्तिरिति वाच्यम्॥ वर्तमानत्वादिवि

व्यु॰ वा॰ वक्षास्थले स्वार्थ[illegible]बोधप्रयोजकाकांक्षाशालित्वे नैव तदविवक्षास्थले विभागव्याख्यातस्यार्थबलात् ॥ केचित्तु घञंतस्यापि पाकादौ शक्तिरूप्यते ॥
५ अन्यथा सुब्विभक्त्यर्थसंख्याकर्मत्वादीनां तत्र पाकादावन्वयानुपपत्तेः ॥ प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति व्युत्पत्तेः ॥ धात्वंशस्य वि-
भक्त्यप्रकृतित्वात् ॥ प्रकृत्येकदेशार्थेपि प्रत्ययार्थान्वयोपगमे पचंतं पश्यतीत्यादितः पच्यमानं पश्यतीत्यादितश्च पाकादौ द्वितीयाद्यर्थकर्मत्वाद्यन्व-
यप्रसंगात् ॥ एकविशेषणत्वेनान्वितस्यान्यत्र विशेषणत्वेनान्वयस्याव्युत्पन्नत्वेन तत्र प्रत्ययार्थविशेषणपाकादेर्न कर्मत्वे विशेषणतयान्वय इ-
ति चेत् । तथापि पाकादिविशेषणतया सुबर्थसंख्यान्वयसंभवात् ॥ यत्र पाककर्त्रादेर्द्वित्वादिकं बाधितं पाकादेश्च तदबाधितं तत्र पचंतौ पश्यति
पचमानौ पश्यतीत्यादिप्रयोगप्रसंगस्य दुर्वारत्वात् ॥ धातूपस्थाप्यार्थे सुबर्थान्वयबोधं प्रति तत्तद्धातूत्तरप्रत्ययधर्मिकं किंचिदर्थपरत्वज्ञा-
नस्य प्रतिबंधकतोपगमेन तादृशातिप्रसंगवारणे च गौरवात् ॥ एवं शोभनं पचनमित्यादौ धातुमात्रेण पाकाद्युपस्थितौ शोभनाद्यभेदान्वय-
बोधानुपपत्तेः ॥ विशेषणविभक्तिसजातीयविभक्तिप्रकृत्यनुपस्थाप्यत्वात् ॥ प्रकृत्येकदेशसाधारणतादृशविभक्तिप्रकृतित्वस्य प्रयोजकत्वे ५
तत्र त्वदुक्ताधिकरणपरत्वेपि तथाविधान्वयबोधापत्तेः ॥ कस्यचित्प्रतिबंधकताकल्पनमिति तद्वारणे च गौरवात् ॥ न चैवमुपकुंभार्धपिप्पल्यादि-
रूपपूर्वपदप्रधानसमासपदात् कुंभसमीपपिप्पल्यर्धादौ विभक्त्यर्थान्वयस्य प्रातिपदिकार्थांतरान्वयस्य चानुपपत्तिः ॥ पूर्वपदस्य समासो

स्कृत

तरविभक्त्यप्रकृतित्वादितिवाच्यम् ॥ एतदनुरोधेनैवतत्र कुंभपिप्पल्यादिपदानामेव कुंभसमीपपिप्पल्यर्थादौ लक्षणायाः पूर्वपदस्यतात्पर्यग्राहमात्रोपयोगिताया
श्चस्वीकारात् ॥ वस्तुतस्तत्रतत्रोत्तरपदार्थविशेषितपूर्वपदार्थसमीपाद्यर्थादौ प्रत्ययार्थान्वयबोधे तादृशसमस्तपदप्रत्ययपदयोरव्यवहितपूर्वापरीभावोपिआकांक्षा
॥ एवंतत्र प्रातिपदिकांतरार्थाभेदान्वयबोधे समानविभक्तिकयोस्तादृशसमस्तपदांतरयोश्च समभिव्याहारोप्याकांक्षा ॥ तथासत्यतिप्रसंगविरहात् ॥ धात्व
र्थेपाकादौ प्रत्ययार्थान्वयबोधे प्रातिपदिकांतरार्थाभेदान्वयबोधे च ल्युट्घञाद्यंतसमुदायप्रकृतिप्रत्ययोरानुपूर्वीरूपाव्यवहितपूर्वापरीभावस्यसमान
विभक्तिकयोस्तादृशसमुदायपदपदांतरयोः समभिव्याहारस्यचाकांक्षात्वोपगमे दर्शिताधिकरणार्थकल्युट्प्रत्ययस्थलीयातिप्रसंगस्यदुरुद्धरतयानुप्रसं
गः ॥ अथघञाद्यंतसमुदायस्यसार्थकत्वेघञाद्यंतसमुदायस्य संयोगत्वविभागत्वविशिष्टवाचकत्वंव्युत्पाद्य संयोगविभागादिपदानांनैमित्तिकसंज्ञा
त्वनिराकरणंदीधितिकृतोविरुध्यतेइतिचेत्काक्षतिः ॥ नहिकस्यचिद्ग्रंथकृतोविपरीतलेखनंयुक्तिबलाद्वस्तुसिद्धेर्बाधकम् ॥ एवंचयत्रधातुमात्रस्यपाका
द्यैतात्पर्यंतत्रतद्विशेषणवाचकपदात् द्वितीयैव । यत्रतुकृदंतस्यसमुदायस्यतात्पर्यंतत्रतादृशपदंतथाविधकृदंतसमुदायसमानविभक्तिकमेव । तदुक्तम्
कातंत्रपरिशिष्टकृता कथंस्तोकः पाकः कृदंतविशेषणत्वात् ॥ धात्वर्थैकाधिकरण्येतुस्तोकमोदनस्यपाकइतितुस्यादेवेतिवदंति ॥ तदर्थबोधकपदोत्तरविभ
क्त्यासंख्याबाधनेऽभेदसंसर्गावच्छिन्नप्रकारताभिन्नतदर्थविषयताशालिशाब्दबोधसामान्यपेक्षितातादृशश्चबोधः तदर्थविशेष्यकः ॥ तदर्थनिरूपि

नीलो घटः

व्यु० वा० तभेदान्वयविषयश्चैवं नीलो घट इत्यादौ च विशेष्यवाचकपदोत्तरविभक्त्यैव द्वित्वादिकं प्रत्याय्यते । एवं च क्रियाविशेषणवाचकविभक्त्या बोधितयोरपि द्वि
त्वबहुत्वयोः प्रत्याय्यतासंभवात् तादृशपदोत्तरमौत्सर्गिकमेकवचनमेव भावाख्यातस्थलवदित्यवधेयम् अभेदान्वयश्चाविरूपोपस्थितयोरेवेति व्युत्पत्तिः
५ घटो घटः दण्डवान् दण्डवान् पाकं पचतीत्यादौ घटत्वदण्डवत्त्वपाकत्वाद्यवच्छिन्नेन तद्रूपावच्छिन्नस्य तथान्वयबोधानुदयात् ॥ अथ तत्त्वं योजकसमान
विभक्तिकत्वादेः सत्त्वात्कथं न तादृशान्वयबोधः अत्राहुः ॥ यादृशं फलं क्वचित्प्रसिध्यति तादृशस्यैवापत्तिः संभवति क्रमसामग्रीकत्वात् ॥ यादृशं
चसर्वत्रैवाप्रसिद्धतादृशस्यापादकाप्रसिद्ध्यापत्तिरशक्यैवेति घटत्वावच्छिन्नविशेष्यताकाभेदसंसर्गकघटत्वावच्छिन्नप्रका×ब×रकशाब्दबो
धस्य च क्वचिदप्यभावान्नापत्तिः ॥ अथ घटो नीलघटः दण्डवान् नीलदण्डवानित्यादौ तादृशशाब्दबोधस्य प्रसिद्धिः ॥ विधेयकोट्यवधिकावगाहिनः
शाब्दबोधस्य नवीनैरुप×दा×गमादिति चेत् तर्हि घटाद्यंशे विशेषणतावच्छेदकविधया नीलत्वादिभाननियामकनीलाद्युपस्थितितात्पर्यज्ञान
घटितैव सामग्री घटत्वावच्छिन्नविशेष्यकनीलघटत्वावच्छिन्नाभेदान्वयबोधप्रयोजिका तदभावादेव घटो घट इत्यादौ न तादृशान्वयबोधापत्तिरिति ५
अथ केचित् ॥ तन्न अखण्डव्युत्पत्त्यादौ धर्मितावच्छेदकतासंबन्धेन प्रसिद्धस्य भुत्व्यघटत्वावच्छिन्नप्रकारकाभेदान्वयबोधस्य घटत्वादावापत्तेः । न च तत्रा
पादकाभावः ॥ तत्र तात्पर्यज्ञानविशेषादिघटिताया धर्मितावच्छेदकतयाऽव्यपत्वादौ तदुत्पादनियामकसामग्र्या एवापादकत्वात् ॥ न च धर्मिता

12

वच्छेदकतासंबंधेन द्रव्यत्वादेस्तादृशान्वयबोधोत्पत्तिप्रयोजिकाद्रव्यपदजन्यद्रव्यत्वाद्यवच्छिन्नविशेष्यकोपस्थितितदवच्छिन्नविशेष्यकयोग्यता
ज्ञानादिघटितसामग्र्येव धर्मितावच्छेदकतायास्तत्कार्यतावच्छेदकसंबंधताविरहेपि द्रव्यत्वादिनिष्ठायास्तस्यास्तत्कार्यतावच्छेदकधर्मघट
कत्वात्तस्याश्चात्मनिष्ठप्रत्यासत्त्या द्रव्यत्वाद्यवच्छिन्नविशेष्यकघटत्वाद्यवच्छिन्नाद्यभेदबुद्धित्वरूपकार्यतावच्छेदकावच्छिन्नोत्पत्तेरेवव्याप्यतया घटत्वादेर्धर्मितावच्छे
दकतासंबंधेन घटत्वावच्छिन्नाभेद बोधापादकत्वं न संभवतीति वाच्यं योग्यताज्ञानस्य धर्मितावच्छेदकं निवेश्य तद्भेदेनानंतकारणताकल्पनमपेक्ष्य ला
घवाद्धर्मितावच्छेदकतासंबंधेन शाब्दबुद्धौ तादृशसंबंधेन तस्य धर्मितावच्छेदकमनिवेश्य हेतुताकल्पनस्यैवौचित्यात् घटत्वादिधर्मितावच्छेदकक
घटत्वाद्यवच्छिन्नप्रकारकयोग्यताज्ञानबलादेव घटत्वादेर्धर्मितावच्छेदकतासंबंधेन तदापत्तेः नन्वयोग्यताज्ञानस्य धर्मितावच्छेदकनिष्ठप्रत्यासत्त्या
हेतुत्वोपगमे द्रव्यत्वाद्यवच्छिन्नस्य पदादनुपस्थितत्वेपि द्रव्यत्वादेस्तादृशप्रत्यासत्त्यासत्त्वाच्च योग्यताज्ञानात्तादृशप्रत्यासत्त्या शाब्दबोधापत्तिः आत्म
निष्ठप्रत्यासत्त्या हेतुत्वे तद्द्रव्यत्वाद्यवच्छिन्नोपस्थितिमंतरेणापि तादृशप्रमेयत्वाद्यवच्छिन्नोपस्थित्यादिदशायां प्रमेयत्वादेर्धर्मितावच्छेदकतासंबंधेन यो
ग्यताज्ञानस्य फलजनकत्वात्। तादृशद्रव्यत्वावच्छिन्नोपस्थितिविरहस्याकिंचित्करत्वादिति वाच्यं। समानप्रकारताप्रत्यासत्त्या पदार्थोपस्थितेः शाब्दबोध
धo हेतुत्वोपगमात् येन संबंधेन यद्धर्मावच्छिन्नकार्यं प्रति येन संबंधेन यद्धर्मावच्छिन्नकार्यस्य व्यापकता तेन संबंधेन तद्धर्मावच्छिन्नकारणघटितसामग्र्या अपि ते धo

प्रo

13

४नतु विषयनिष्ठप्रत्यासत्त्या४

४पदार्थोपस्थितिः घटत्वकृतत्वमितिशेषः
प्रकृतपदार्थः४

व्यु० वा० नसंबंधेनतद्धर्मावछिन्नकार्यतानिरूपकोपस्थिततया प्रकारतासंबंधेन द्रव्यत्वादौ द्रव्यपदजन्यपदार्थोपस्थितिसत्त्वेन तत्र धर्मितावछेदकतासंबंधेन शाब्दबोधापत्तेर
योगात् । न च यत्र प्रमेयत्वावछिन्नविशेष्यकवृत्तिज्ञानजन्यप्रमेयत्वावछिन्नविषयकोपस्थितितानवोद्बोधकान्तराद् द्रव्यत्वावछिन्नस्य भानं तत्र द्रव्यत्वावछिन्नवि
७ षयकशाब्दापत्तिवारणाय तद्धर्मावछिन्नविशेष्यकवृत्तिज्ञानजन्यतद्धर्मप्रकारकोपस्थितित्वेनैव पदार्थोपस्थितेर्हेतुता वाच्या तथा च प्रकारविशेषणवि
वेशावश्यकत्वे आत्मनिष्ठप्रत्यासत्त्या हेतुताकल्पनमनुचितं । अन्यथा पुरुषभेदेन कार्यकारणभावबाहुल्यप्रसंगादिति वाच्यम् स्वजनकज्ञानीयवृ
स्व त्तिप्रकारतानिरूपितविशेष्यतावछेदकताविशिष्टप्रकारतासंबंधेनोपस्थितेर्हेतुतां स्वीकृत्य तादृशापत्तेर्वारणात् । न च पदार्थे पि प्रकारतासंबंधेन शा
ब्दबोधः उत्पद्यते ॥ तत्र प्रकारतासंबंधेन पदार्थोपस्थितेरभावात् प्रकारनिष्ठप्रत्यासत्त्या पदार्थोपस्थितिहेतुता व्यभिचारेण कल्पयितुमशक्यतेति
वाच्यं ॥ परामर्शकारणताविचारदर्शितदिशा व्यभिचारस्य वारणीयत्वादिति चेत् तर्हि तद्धर्मावछिन्नाभेदसंसर्गावछिन्नप्रकारतानिरूपितविशे
ता ष्यतावछेदकसंबंधेन शाब्दत्वावछिन्नं प्रति तद्धर्माभेदस्यापि हेतुतायाः स्वीकरणीयतया न घटो घट इत्यादिस्थले शाब्दबोधापत्तिः ॥ स घट इत्या
दिवाक्याज्जातित्वादिना घटत्वादिना धर्मितावछेदककस्य स्वरूपतो घटत्वादिप्रकारकस्य घटः स इति वाक्यात्स्वरूपतो घटत्वादिधर्मितावछेद ७
ककस्य जातित्वादिविशिष्टघटत्वाद्यवछिन्नप्रकारकस्य च शाब्दबोधस्योपपत्तये विशेष्यत्वप्रकारत्वयोरवछेदकत्वे निरवछिन्नत्वेन विशेषणीये ॥

क

॥वछेदकक

14

स्वान्यधर्मानवच्छिन्नत्वनिवेशनेनेतिभावः॥

घटोनीलघटइत्याद्यन्वयबोधस्यप्रामाणिकत्वेअन्यत्रदर्शितरीत्यासोप्युपपादनीयः॥सत्त्वत्यादिवाक्याज्जातित्वावच्छिन्नधर्मितावच्छेदकताकतद्ध
र्मावच्छिन्नप्रकारतावच्छेदकताकाभेदान्वयबोधस्यवारणायतद्धर्मावच्छिन्नावच्छेदकताकप्रकारतानिरूपितधर्मितावच्छेदकतावच्छेदकताप्रत्यासत्त्याशा घटनिष्ठ
ब्दंप्रतितद्धर्मभेदस्यापिपृथक्कारणत्वंकल्पनीयं॥एवंदण्डवान् दण्डवानित्यादिवाक्याद्दण्डसंयोगत्वावच्छिन्नवत्तितदवच्छिन्नवदभेदान्वयबोधवारणाय
संयोग दण्डत्वावच्छिन्नावच्छेदकताकप्रकारतानिरूपितधर्मितानिरूपितसंयोगत्वावच्छिन्नावच्छेदकतानिरूपितावच्छेदकतावच्छेदकत्वसंबन्धेनशाब्दबुद्धौ
दण्डत्वादिभेदस्यपृथक्कारणताःकल्पनीयाः॥अवच्छेदकतायानिरवच्छिन्नत्वनिवेशोऽपिपूर्ववद्बोध्यः॥वस्तुतस्तुतद्धर्मान्यवृत्तिविषयतासंबन्धेनज्ञानप्र
तितद्धर्मभेदत्वेनहेतुतालाघवात्॥घटत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबन्धेनशाब्दंप्रतिघटत्वान्यवृत्तिविषयतासंबन्धेनज्ञा
नत्वावच्छिन्नस्यव्यापकतयाघटत्वादौतादृशविषयतासंबन्धेनज्ञानत्वावच्छिन्नोत्पादकसामग्रीविरहेणनतादृशविशेष्यतावच्छेदकतासंबन्धेनशाब्दबो
धापत्तिः॥एवंचघटवान्घटवानित्यादिशाब्दबोधवारणानुरोधेनधर्मितावच्छेदकतावच्छेदकानिर्दिष्टप्रत्यासत्त्याकारणतांतरमपिनकल्प्यते॥एवमु
द्देश्यतावच्छेदकविधेययोरैक्येनैकोद्वावित्यादिवाक्यादेकत्वद्वित्वावच्छिन्नेएकत्वद्वित्वादीनामभेदान्वयबोधानुदयात्॥एकत्वत्वद्वित्वत्वावच्छिन्नसमवाया
दिसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितसमवायादिसंसर्गावच्छिन्नावच्छेदकतावच्छेदकत्वादिसंबन्धेनशाब्दबुद्धावेकत्वादिभेदस्य॥एवं
त्व

कर्मत्वाद्यवच्छिन्नआधेयतासंबंधेन तद्धतोन्वयबोधवारणाय

द्वौ शाब्दबुद्धे कर्मत्वत्वादिभेदस्य घपदेन घटइत्याद्यनुमितेः शाब्दस्य वारणाय घटत्वाद्यवच्छिन्नभेदप्रकारतानिरूपितधर्मितावच्छेदक

व्यु॰ वा॰ कर्म गच्छतीत्यादौ कर्मत्वत्वाद्यवच्छिन्न आधेयतासंबंधेन तद्वतोन्वयबोधकारणाय कर्मत्वत्वाद्यवच्छिन्नावच्छेदकताकाधेयतासंसर्गावच्छिन्नप्र
कारतानिरूपितधर्मितावच्छेदकत्वसंबंधेनानुमितौ शाब्दबोधे च घटत्वादिभेदस्य हेतुतान्तरकल्पनम[illegible]देयमेव अतएव भेदस्यैकैककारणतये
८ व सकलातिप्रसंगवारणसंभवादिति कृतं पल्लवितेन। भेदान्वयबोधश्च प्रातिपदिकार्थधात्वर्थयोः अन्यथार्थेन क्वचिन्निपातार्थेन सममेव जा
यते॥ न त्वन्येन सत्यपि पदार्थोपस्थितियोग्यताज्ञानादिरूपकारणकलापे राजापुरुषः भूतलं घट इत्यादौ पुरुषघटयोः राजभूतलादेः स्वत्वा
धेयत्वादिसंबंधेन तंडुलः पचति चैत्रः पच्यते इत्यादौ कर्मत्वकर्तृत्वादिसंबंधेन तंडुलचैत्रादेः पाकादेः स्वकर्मत्वस्वकर्तृत्वादिसंबंधेन पाकाद्य
शे वा तंडुलचैत्रादेरन्वयाबोधान्निपातातिरिक्तप्रातिपदिकार्थयोः। क्रियाताद्दृशप्रातिपदिकार्थयोश्च भेदेन साक्षादन्वयबोधस्याव्युत्पन्नत्वात्
विभक्त्यर्थमंतरा कृत्य तयोरन्वयबोधासाक्षादिति॥ निपातातिरिक्तत्वविशेषणाद्भूतलेन घटः घटेन पट इत्यादौ घटादेर्नञर्थाभावेन मुखं चंद्र
इवेत्यादौ मुखचंद्रादीनामिवार्थसादृश्यादिना न कलिंजं भक्षयेदित्यादौ नैयायिकमते नञुपस्थाप्येन बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनता ८
दिरूपलिङर्थस्याभावेन धात्वर्थभक्षणादेरनुयोगितया गुरुमते विध्यर्थापूर्वांशे विशेषणतयान्वितेन नञुपस्थाप्याभावेन धात्वर्थभक्षणादेः प्र
तियोगितयाऽन्वयेपि न क्षतिः॥ राजपुरुष इत्यादिसमासस्थले तु पुरुषपदार्थेन समं राजादिपदार्थस्य न भेदेनान्वयः॥ किंतु तेन समं विभक्त्य
तार्थविशिष्टलाक्षणिकराजादिपदोपस्थापितराजादिसंबंध्यभेदान्वय एवेति न दोषः॥ एवं मुखं चंद्र इत्यादिरूपकस्थलेपि चंद्रादिपदस्य चंद्रादिसद

16

शीलक्षणयामुखादौचंद्रादिसदृशाभेदान्वयएवबोधेनतुसादृश्यसंबंधेनचंद्रादेर्मुखादावन्व[illegible]तिनैतेनव्यभिचारः॥ केचित्तुरूपकस्थलेचंद्रादि
पदस्यचंद्रादिसदृशेनलक्षणा किंतुतत्रमुख्यार्थचंद्रादेरेवाभेदभ्रमोमुखादौ मुखंनचंद्रइत्यादिविशेषदर्शनदशायांचनतत्रशाब्दोभेदप्रत्य
यः॥ अपितुशब्दजन्यविशकलितपदार्थोपस्थितिमूलकोमानसएवाहार्यभ्रमइत्याहुः॥ अपरेतुतादात्म्यातिरिक्तसंबंधेननामार्थयोर्नान्वयबो
धः॥ तादात्म्यंचप्रकृतेतद्वृत्तिधर्मवत्वं एवंचनीलोघटइत्यादौस्ववृत्तिनीलत्वादिमत्वसंबंधेनघटपदार्थेनीलपदार्थस्य। एवंमुखंचंद्रइत्यादौस्ववृ
त्त्याल्हादित्वादिमत्वसंबंधेनमुखादौचंद्रादेरन्वयबोधः। तादृशान्वयबोधेपिसमानविभक्तिकत्वादिकंतंत्रमतोनातिप्रसंगइतिवदंति॥ अथराजापुरु
षइत्यादौपदार्थोपस्थित्यादिसत्वेनकथंनाभेदान्वयबोधः। सामग्र्याःकार्यजननेउक्तनियमभंगरूपायाःप्रयोजनक्षतेरकिंचित्करत्वात्॥ सामग्रीसत्वेऽव
श्यंकार्यमितिनियमात्॥ नचतत्राभेदान्वयबोधौपयिकाकांक्षाविरहात्तुशाब्दबोधसामग्र्येवासिद्धेतिवाच्यं। समभिव्याहाररूपाकांक्षायास्तत्रापिसत्वात्॥ पि
नचतत्रतादृशाकांक्षायास्तत्रसत्वेपिराजादिपदार्थप्रकारकाभेदान्वयबोधेराजादिपदोत्तरङःसपदत्वरूपानुपूर्वीविशेषाकांक्षायाअपिप्रयोजकत्वात्॥
तदभावादेवनतत्रशाब्दबोधसामग्रीतिवाच्यं॥ संबंधादिविशेष्यकराजादिप्रकारान्वयबोधेएवतादृशाकांक्षाज्ञानस्यहेतुतयापुरुषादौराजादिप्रकारान्व
यबोधोत्पत्तौतादृशाकांक्षाज्ञानरूपकारणविरहस्याकिंचित्करत्वात्। अत्रकेचित्॥ नामार्थप्रकारकाभेदान्वयबोधंप्रतिसमानविशेष्यताप्रत्यासत्त्याप्र

एतन्नामपदजन्येत्यादि ४ तर

व्यु० वा० त्ययजन्योपस्थितेर्हेतुत्वकल्पनात् नामार्थप्रकारकशाब्दान्वयबोधे विशेष्यतया प्रत्ययार्थस्यैव भान[illegible]मार्थस्य । तत्र विशेष्यतासंबंधेन प्रत्ययजन्योपस्थि
तेरभावात् । न च संबंधादेरपि नामार्थतया तत्प्रकारकान्वयबोधे पुरुषादिपदार्थस्य विशेष्यतयाभानानुपपत्तिः ।। तत्तन्नामपदजन्यतत्तन्नामार्थप्रकारक
९ शाब्दबोधं प्रति प्रत्ययजन्योपस्थितित्वेन हेतुत्वेऽपि राजसंबंधः प्रमेयः राजः पुरुष इत्यत्र तादृशवाक्यद्वयजन्यबोधे पुरुषस्य राजसंबंधविशेष्यतयाभानानुपप वाक्यार्थे प
त्तिरिति वाच्यं ।। प्रत्ययाधीनतत्त[illegible]दर्थोपस्थितिजन्यतत्तदर्थप्रकारकशाब्दबोधत्वावच्छिन्नं प्रति प्रत्ययजन्योपस्थितेः समानविशेष्यताप्रत्यासत्त्या
हेतुत्वोपगमात् ।। अथैवमपि राजा पुरुष इत्यत्र पुरुषपदाधीनपुरुषोपस्थितौ प्रत्ययवशात् यत्र कश्चित्प्रत्ययार्थो विषयीभूतस्तत्र प्रत्ययजन्यतथाविध
समूहालंबनोपस्थितेर्विशेष्यतासंबंधेन पुरुषेऽपि सत्त्वात् ।। तस्य राजप्रकारकान्वयबोधे विशेष्यतयाभानापत्तिर्दुर्वारैव । न च प्रत्ययजन्यतावच्छेदकीभू
तविशेष्यतासंबंधेनोपस्थितेर्हेतुत्वोपगमान्नापत्तिः ।। तादृशसमूहालंबनोपस्थितिनिरूपितपुरुषनिष्ठविशेष्यताया नामपदजन्यतावच्छेदकत्वादि
ति वाच्यं ।। ज्ञानभेदेन विशेष्यताभेदाभावात् ।। यत्र कुत्रचित्प्रत्ययादेर्लक्षणादिना पुरुषाद्युपस्थितिः तत्र तादृशोपस्थितिनिरूपितप्रत्ययजन्यता
वच्छेदकीभूतविशेष्यतातः पुरुषादिपदजन्यपुरुषाद्युपस्थितिविशेष्यताया अभिन्नतया तादृशतापुरस्कारातिप्रसंगवारणासंभवादिति चेन्न ।। स्वजनकज्ञा ९
नीयप्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यताविशिष्टविशेष्यतासंबंधेनैवोपस्थितेर्हेतुतया उक्तसमूहालंबनोपस्थितिनिरूपितपुरुषनिष्ठविशेष्यता

पदार्थोपस्थितिः

माख्यता दृशोपस्थितिजनकज्ञानीयप्रत्ययस्य वृत्तिप्रकारतानिरूपितविशेष्यतासामानाधिकरण्यविरहान्नातिप्रसंग इति वदंति तदसत् ॥ प्रत्ययत्वस्य ऽनुगतानतिप्रसक्तस्य दुर्वचतया उक्तकार्यकारणभावकल्पनया असंभवात् ॥ राजसंबंधः पुरुष इत्यादौ तु संबंधादिपदे ऽसुपदत्वादिभ्रमदशायां संबंधविशेष्यताकराजादिपदार्थप्रकारकान्वयबोधानुपपत्तेः ॥ राज्ञः पुरुष इत्यादौ षष्ठ्यादेः प्रत्ययत्वाद्यनुपस्थितावपि आनुपूर्वीविशेषप्रकारकज्ञानाधीन × राज्ञः पुरुष इत्यादौ सुपदादौ संबंधभ्रमे मेपदेपि संबंधाद्यंशे राजादिप्रकारकान्वयबोधापत्तेश्च । न च प्रत्ययत्वेन ज्ञानं तत्पदजन्योपस्थितेः कारणत्वादेतद्दोषद्वयस्यानावकाश इति वाच्यं तत्पदोपस्थितिसत्वे शाब्दबोधोत्पत्त्या प्रत्ययत्वप्रकारकज्ञानविशेषासंभवात् ॥ इदं पुनरत्र तत्वं ॥ राजा पुरुष इत्यादौ पुरुषादिविशेष्यकराजादिप्रकारकभेदान्वयबोधस्याप्रसिध्यैव नापत्तिसंभवः ॥ यत्र षष्ठ्यादिविभक्तेरेव स्वारसिकलक्षणया शक्तिभ्रमेण वा पुरुषाद्युपस्थितिस्तत्र तद्विशेष्यकराजादिपदार्थप्रकारकभेदान्वयबोधः प्रसिद्ध इति चेत् तर्हि तादृशबोधे प्रकृतिप्रत्ययानुपूर्वीरूपाकांक्षाज्ञानसहकृततद्विभक्तिजन्यपुरुषाद्युपस्थितिघटितसामग्र्या एव तादृशबोधोत्पत्तिनियामकतया तदभावादेव न तदापत्तिः ॥ अतएव स्वत्वादिसंबंधेन राजादिविशिष्टपुरुषादितात्पर्यकतदादिपदघटितात्सस्कंद इत्यादिवाक्यात्पुरुषादिविशेष्यकस्वत्वादिसंसर्गकराजादिप्रकारकशाब्दबोधस्याप्रसिध्या राजा पुरुषः स्कंद इत्यादौ पदार्थोपस्थितियोग्यताज्ञानबलात्तादृशशाब्दबोधापत्तिर्निरस्तम् रीति सस्कंद इत्यादिवाक्यार्थशाब्दबोधसामग्र्याः तत्पदत्वाद्यवच्छिन्नविशेष्यकत्वं तदादिपदसमभिव्याहारज्ञानसहकृततदादिपदजन्यतादृशनि

ऽन्यस्य

त्वे

श्री

१राजपदसमभिव्याहृतपुरुषपदत्वरूपा१

व्यु०वा० शिष्टार्थोपस्थितिघटितत्वया तदभावादेवापत्त्यभावात्॥ अथैतादृशरीत्या आपत्तिवारणे राज्ञः पुरुष इत्यादौ स्वत्वादिसंबंधेन पुरुषादौ राजाद्यन्वयबो
धस्वीकारेपि क्षतिविरहात् अक्रव्युत्पत्तिर्निर्युक्तिका॥ विभक्तीनां संबंधादिवाचकत्वमपि निर्युक्तिकं नीलो घट इत्यादौ विशेषणवाचकपदसमभिव्याहृतवि
१० भक्तेरिव सर्वत्र विभक्तीनां साधुत्वमात्रार्थकत्वस्यैवोचितत्वात्॥ नहि तत्र तथाविधान्वयबोधोपगमे तत्स्थलीयसामग्रीबलाद्राजा पुरुष इत्यादावपि
तथाविधान्वयबोधप्रसंगः संभवति तत्स्थलीयसामग्र्याः षष्ठ्यंतराजपदत्वाद्यवच्छिन्नधर्मिकपुरुषादिपदनिरूपितसमभिव्याहाररूपाकांक्षाज्ञानघटि
तादृश ततयातदभावादेव तत्र सामग्र्या अभावात्। एवं च राजपुरुष इत्यादिसमासे राजादिपदस्य राज्ञि संबंध्यादिलक्षणास्वीकारेपि व्यर्थः तत्राभेदान्वयस्वी
कारेपि क्षतिविरहात्॥ न च तत्र भेदान्वयबोधाभ्युपगमे तत्स्थलीयसामग्रीबलात् राजा पुरुष इत्यादावपि तादृशबोधापत्तिः। तत्स्थलीयशाब्दबोधे राजा
दिपदाव्यवहितोत्तरपुरुषादिपदत्वरूपानुपूर्वीविशेषज्ञानस्य हेतुतया असमासस्थले पुरुषादिपदस्य विभक्त्या राजादिपदव्यवहितत्वान्न तादृशानुपूर्वीवि
शेषज्ञानासंभवेन तत्र तादृशसामग्र्याः असिद्धेः॥ न च प्रकृतिप्रत्यययोरेवानुपूर्वीविशेषस्याकांक्षात्वात् प्रातिपदिकद्वयाव्यवधानघटितोक्तानुपूर्वीविशेष १०
ज्ञानस्य हेतुत्वमेव निष्प्रामाणिकमिति वाच्यं॥ भवन्मतेपि राजपुरुष इत्यादौ यादृशसामग्रीबलाद्राजपदार्थराजसंबंधिपुरुषपदार्थयोरभेदान्वयबोधस्ता राम
दृशसामग्रीबलाद्राज्ञः पुरुष इत्यादावपि राजपदस्य राजसंबंध्यादौ लक्षणाग्रहसत्वे तादृशाभेदान्वयबोधप्रसंगवारणाय तथाविधानुपूर्वीज्ञानस्य स
मासजन्यबोधे हेतुत्वकल्पनस्यावश्यकत्वात्॥ अस्माभिर्भेदान्वयबोध एव तादृशानुपूर्वीज्ञानस्य हेतुतायाः कल्पनीयत्वात् उभयमत एव राजसंबंधिनि

२ राजपदाव्यवहितोत्तरपुरुषपदत्वरूपाद्रूपमेव गौरवमिति भावः २ ५ अव्यवहितोत्तरत्वघटितं ५ ४ अव्यवहितोत्तरत्वस्य ४ ३ इयं खंडनेपि बोध्या ३

राजपदस्य स्वारसिकलक्षणया राजपुरुष इत्यत्र राजसंबंधिपुरुषयोरभेदान्वयबोधो भवति । इयांस्तु विशेषो यदस्मन्मतेऽसौ समासः षष्ठीतत्पुरुषो भवति त्वन्मते तु कर्मधारय इति ॥ एवं च पुरुषविशेष्यकाभेदसंसर्गकराजसंबंधिप्रकारकबोधे राजपदाव्यवहितोत्तरपुरुषपदत्वप्रकारकज्ञानहेतुत्वमुभयवादिसिद्धमेव ॥ परंतु भेदान्वयबोधे तादृशानुपूर्वीज्ञानहेतुताकल्पनमधिकमिति वाच्यं । उक्ताभेदान्वयबोधे तथाविधानुपूर्वीज्ञानहेतुतायां पर्याप्त्यंतरघटितानुपूर्वीज्ञानजन्यत्वे तथाविधानु~~पूर्वीज्ञानहेतुतायां पर्याप्त्यभावांतरघटितानुपूर्वीज्ञानजन्यत्वे~~ तथाविधान्वयबोधे व्यभिचारवारणाय तादृशानुपूर्वीज्ञानानंतर्यस्यैव कार्यतावच्छेदककोटौ प्रवेश्य निवेशनीयत्वात् तत्र विषयनिवेशप्रयोजनाभावेन तादृशकार्यतावच्छेदकस्यैव भेदान्वयबोधसाधारण्येनानुपूर्वीज्ञानहेतुताया अनाधिक्यात् ॥ एवं तंडुलं पचतीत्यादावपि पाकादिरूपधात्वर्थे कर्मत्वादिसंबंधेनैव तंडुलादेरन्वयबोधः स्वीकर्तुमुचितः कर्मत्वादेः पाकाद्यंशे प्रकारत्वेन तत्र शक्तिकल्पने तादृशवाक्यजन्यशाब्दबोधे कर्मत्वादिसंसर्गस्याधिकस्य विषयताकल्पनेन च गौरवात् ॥ तंडुलं पचतीत्यादिवाक्यजन्यसामग्रीबलात् तंडुलः पचतीत्यादावपि तथाविधान्वयबोधापत्तिस्तु न संभवति ॥ तादृशान्वयबोधे द्वितीयांतपदात् तंडुलपदत्वाद्यवच्छिन्नधर्मिकपचतीत्यादिसमभिव्याहारज्ञानस्य हेतुतया तंडुलः पचतीत्यादौ तादृशसामग्र्या असिद्धेः ॥ एवं पचति चैत्र इत्यादावपि कृतिसंबंधेन पाकादेश्चैत्राद्यंशेऽन्वयबोधस्वीकार उचितः ॥ अन्यथोक्तरीत्या गौरवात् ॥ तत्र तादृशान्वयबोधस्वीकारे तत्कालीयसामग्रीबलात् पच्यते चैत्रः पाकश्चैत्र इत्यादौ तथाविधान्वयबोधापत्तेरप्युक्तरीत्यैव वारणसंभवादिति भावः ॥ राज्ञः पुरुष इत्यादौ षष्ठ्यादेः स्वत्वादिवाचकत्वमावश्यकम् ॥ अन्यथा पुरुषो न राज्ञ इत्यादौ पुरुषे

राजसेवक इत्यादिस्था

५ भेदान्वयअ भेदान्वयस्तु

७ कर्मत्वादीनां पदार्थत्वात्

१० आश्रयतादिसंबंधावच्छिन्नस्वत्वप्रतियोगिताकाभावबुद्धावित्यर्थः

गा॰टी॰ राजस्वत्वाद्यभावबोधानुपपत्तेः ॥ न हि तत्र स्वत्वादिसंबंधावच्छिन्नप्रतियोगिताको राजाद्यभाव एव भासत इति संभवति । स्वत्वादिसंबंधस्य वृत्त्यनिया ग॰ सि॰
मकतया प्रतियोगितानवच्छेदकत्वेन तत्संबंधावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः ॥ अत एव स्वामित्वादिकं परित्यज्य स्वत्वादेः षष्ठ्यर्थत्वं नवी
३३ नाः स्वीकुर्वंति ॥ स्वामित्वादेः षष्ठ्यर्थत्वे तस्य निरूपकतासंबंधेन स्वांशो अन्वयसंभवेपि तादृशसंबंधस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदक
स्वरूपस॰ त्वेन तत्संबंधावच्छिन्नाभावस्य नञा प्रतिपादनासंभवात् ॥ आश्रयतासंबंधावच्छिन्नाभावबोधस्य तादृशसमभिव्याहारस्थले अभ्युपगमे चैत्रा
दिसंबंधिधनेपि आश्रयतासंबंधावच्छिन्नप्रतियोगिताकचैत्रवृत्तिस्वत्वाभावसत्त्वात् नेदं चैत्रस्येति प्रयोगापत्तेः । न च नञ्समभिव्याहारस्थलानुरो
धेन षष्ठ्यादेः स्वत्वादिवाचकत्वेपि राज्ञः पुरुष इत्यादौ षष्ठ्याद्यर्थस्य संसर्गमर्यादया भानमुचितम् ॥ तस्य प्रकारत्वोपगमे तत्संसर्गभानकल्
स्वत्व पने गौरवात् ॥ नञ्समभिव्याहारस्यैव तत्प्रकारकबोधाभ्युपगमे नियामकत्वात् तत्सामग्रीबलात् तत्प्रकारकबोधस्य तदसमभिव्याहारस्थले । सं न
भवादिति वाच्यम् ॥ एवं सति नञं विना यादृशसमभिव्याहारस्थले यत्र धर्मिणि येन संबंधेन यस्य विशेषणतया भानं तत्र नञ्समभिव्याहारे तत्र धर्मि
णि तत्संबंधावच्छिन्नप्रतियोगिताकाभावः प्रतीयत इति सर्वसिद्धनियमापलापापत्तेः ॥ राज्ञः पुरुष इत्यादिवाक्यजन्याप्रामाण्यज्ञानानास्कंदितबो ३३
धदशायां पुरुषो न राज्ञः इत्यादिवाक्यादपि शाब्दबोधापत्तेः । स्वत्वाभावबुद्धौ स्वत्वसंसर्गज्ञानस्य विरोधित्वे मानाभावात् ॥ वृत्त्यनियामकसंबंध
स्याभावप्रतियोगितावच्छेदकत्वेपि राज्ञः पुरुष इत्यादौ राजस्वत्वादेः प्रकारताभ्युपगम उचितः । अन्यथा तादृशसमभिव्याहारज्ञानघटितशाब्दसा

मत्री काले राजत्वलाभाववान्पुरुषः सुन्दर इत्याकारकविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षवारणाय तत्र तादृशसामग्र्याः प्रतिबंधकताकल्पनाधिक्ये गौरवात् ।। अस्मन्मते तादृशसमभिव्याहारज्ञानघटितसामग्र्याः राजत्वत्वाभाववान्पुरुष इत्यादिबाधाभावघटिततया तत्सत्त्वे विशेष्यतावच्छेदकादिप्रकारकनिश्चयरूपकारणविरहादेव तथाविधविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षोत्पत्त्यसंभवेन तादृशसामग्र्यास्तत्र प्रतिबंधकताकल्पनात् ।। अस्मादृशप्रत्यक्षस्थलीयप्रतिबंधकतया च न तन्मते निर्वाहः ।। अन्यत्रान्यविधप्रत्यक्षेच्छानामेवोत्तेजकतया तादृशेच्छायामसत्त्यामुपदर्शितविशिष्टवैशिष्ट्यबोधकत्वप्रकारकेच्छाबलात् उपदर्शितविशिष्टवैशिष्ट्यबोधोपपत्तये अन्यादृशविषयताया एव तत्र प्रतिबध्यतावच्छेदकत्वेनोपगमावश्यकत्वात् ।। न च स्वत्वादेः प्रकारतामतेपि स्वत्वादिसंबंधावच्छिन्नप्रकारताकराजाद्यभावविशिष्टपुरुषादिवैशिष्ट्यबोधे तथाविधसामग्र्याः प्रतिबंधकताधिक्येन गौरवं तत्संसर्गतामते तादृशसामग्र्याः स्वत्वादिसंबंधावच्छिन्नप्रतियोगिताकराजाद्यभाववत्तानिश्चयाभावघटिततया तत्सत्त्वे कारणविरहादेव तथाविधप्रत्यक्षवारणसंभवादिति वाच्यं ।। मन्मते तादृशप्रत्यक्षं प्रति तथाविधसामग्र्याः प्रतिबंधकताधिक्येपि निरूपितत्वादिसंबंधावच्छिन्नप्रतियोगिताकराजाद्यभावविशिष्टस्वत्वादिवैशिष्ट्यबोधेपि तथाविधसामग्र्याः प्रतिबंधकताकल्पनेन तदंशे साम्यात् । तथा च पूर्वोक्तराजत्वलाभाववान्पुरुषः सुन्दर इत्यादिविशिष्टवैशिष्ट्यप्रत्यक्षं प्रति राज्ञः पुरुष इत्यादिशाब्दसामग्र्याः प्रतिबंधकत्वकल्पनं संसर्गतावादिमतेऽधिकमिति ।। न च स्वत्वादेः प्रकारतानये प्रत्यक्षादिकं प्रति तादृशसामग्रीप्रतिबंधकतायां विभक्तिजन्यस्वत्वाद्युप

प्रतियोगिताक

पं०

23

राजस्वत्वाभाववान्पुरुष इत्यादिबाधाभावानिवेशापेक्षयेत

राज्ञः पुरुषः बोधाभावेप्यनुषज्यते राज्ञः पुरुषः १समानविषयकत्वेन

मु० पा० स्थितिनिवेशाधिक्येनैव गौरवम्॥ एतन्मते तादृशोपस्थितिबाधाभाववादीनां तथाविधवाक्यजन्यशाब्दबोधं प्रत्यहेतुतया तादृशवाक्यघटितसामग्रीप्रतिबंधक-
तायां तेषामनिवेशादिति बोध्यम्॥ एवं मतेपि स्वत्वादिसंबंधावच्छिन्नप्रतियोगिताकराजाभावव्याप्यराजस्वत्वाभाववान्पुरुष इत्यादिनिश्चयस्य तदभाव-
१२ व्याप्यवत्तानिश्चयमुद्रया तादृशवाक्यजन्यशाब्दधीविरोधितमात्तादृशनिश्चयाभावस्य तथाविधशाब्दसामग्रीप्रतिबंधकतायां निवेशनस्याधिक्येन लाघवानवका-
शात्॥ मन्मते राजस्वत्वाभाववान्पुरुष इत्यादिबाधाभावानिवेशनेनैव तादृशनिश्चयकाले प्रत्यक्षाद्युपपत्तेस्तदभावानिवेशात्॥ यत्तु राज्ञः पुरुष इत्यादौ रा-
जस्वत्ववान्पुरुष इत्याद्यन्वयबोधोपगमे राजकीयस्वत्वं राजस्वत्ववान्पुरुष इत्याकारकद्विविधानुमितेरेव तदतिरिक्तविषयकत्वेन तथाविधानुमिति-
प्रति प्रत्येकं तादृशवाक्यघटितसामग्र्याः प्रतिबंधकताद्वयं। अस्मन्मते च तादृशानुमित्योस्तथाविधवाक्यजन्याद्राजकीयपुरुष इत्यादिशाब्दबोधादति-
रिक्तविषयकतया तत्र तादृशसामग्र्याः प्रतिबंधकत्वकल्पनं नास्ति तथाविधानुमितितथाविधशाब्दबोधसामग्र्योः सत्वे अनुमितेरेवोत्पत्तेरपि तु राजकीयः
पुरुष इत्याकारकस्वत्वसंसर्गकैकविधानुमितिं प्रत्येव तादृशसामग्र्याः प्रतिबंधकत्वमेकं कल्पनीयमिति लाघवमिति। तदप्यकिंचित्करम्। भवन्मते य-
त्र यादृशानुमितिः स्वीक्रियते अस्मन्मतेपि तत्र तादृशानुमितेः स्वीकरणीयतया अनुमितौ शाब्दसामग्र्याः प्रतिबंधकतासाम्यात्॥ उपदर्शितस्थलेप्य १२
वह्निरनुमितिर्न स्वीक्रियते॥ अस्माभिरपि न स्वीक्रियते॥ कुतः प्रतिबंधकताद्वयमिति॥ तादृशशाब्दं प्रति अनुमितिसामग्रीद्वयस्य प्रतिबंधकतायाः वा

८ स्वत्वसंबंधेन राजाभावप्रकारकज्ञानाभावस्य स्वत्वसंबंधावच्छिन्नप्रतियोगिताकराजाभावव्याप्यराजस्वत्वाभावप्रकारकज्ञानाभावस्य चेत्यर्थः ८ २ इत्येकेतिशेषः २

२ स्वत्वसंसर्गकराजप्रकारकभिन्नविषये अनुमितिसामग्री प्रबला २

न्वतासाम्यात् ॥ एवं राजपुरुष इत्यादिसमासवाक्यात्स्वत्वसंसर्गकशाब्दबोधस्वीकारे तादृशशाब्दसामग्र्याः स्वत्वसंसर्गेण राजविशिष्टपुरुषतात्पर्यज्ञानादि
या: घटितो भिन्नविषयकप्रत्यक्षादिकं प्रतिप्रतिबंधकत्वाधिक्ये गौरवात् ॥ तत्र संबंधिप्रकारकभेदान्वयबोधस्वीकार एवोचित: । न च भवन्मतेपि तादृशशाब्दा
न्वयबोधसामग्र्या: प्रतिबंधकताधिक्येन गौरवमिति वाच्यं ॥ राजपदस्य राजसंबंधिनि स्वारसिकलक्षणाग्रहसत्त्वदशायामभेदसंबंधेन राजसंबंधिविशिष्ट
तात्पर्यग्रहसत्त्वे भवन्मतेपि कर्मधारयत्वेनाभिमतात्तथाविधसमासवाक्यात्तादृशशाब्दबोधस्वीकारस्यावश्यकतया तादृशसामग्रीप्रतिबंधकताया: उभयम
तसिद्धत्वात् ॥ यत्तु दधि पश्येत्यादौ लुप्तद्वितीयाविभक्तिस्मरणेन दधिकर्मकदर्शनबोधवद्राजपुरुष इत्यादावपि लुप्तषष्ठीविभक्तिस्मरणेन राजसंबंधि
प्रकारकभेदान्वयबोधनिर्वाहे राजसंबंधिनि निरूढलक्षणास्वीकृत्याभेदान्वयबोधोपगमो निरर्थक: ॥ न च षष्ठीतत्पुरुषादिस्थले लुप्तविभक्तिस्मरणेनै
व चेदन्वयबोधस्तदा ऋद्धस्य राजमातंगा इत्यादिप्रयोगापत्ति: ॥ अत्र मातंगादौ राजादीनामन्वयबोधोपपत्तये राजादिपदोत्तरषष्ठ्यादिविभक्त्यनुसंधा
नस्यावश्यकत्वे समानविभक्तिकतया राजादेः ऋद्धादिपदार्थस्याभेदान्वयसंभवादिति वाच्यं ॥ यतस्तत्र ऋद्धराजादीनामभेदान्वयानुपपत्त्यानाभियुक्तानामप्र
योग: । अपि तु समासघटकपदस्य सापेक्षतया राजपदस्यासामर्थ्यात्समासासाधुत्वात् ॥ तत्सापेक्षत्वं च तत्पदार्थान्वितस्वार्थपरत्वं स्वार्थश्च स्वीयवृत्तिग्रहविशेष्य: ।
अत एव वृक्षै: शातितपत्र: अथ चैत्रस्य दासभार्या इत्यादौ न समस्यमानशातितदासपदादे: सापेक्षता पदार्थैकदेशशातनदासत्वादाववृक्षकरणकत्व
चैत्रनिरूपितत्वानामन्वयात् ॥ तदर्थान्विते त्वत्राभेदान्वयो वा निवेशनीय इति । तेन यत्र राजपदस्य राजसंबंधिनि स्वारसिकलक्षणाग्रहस्तत्र तादृशबोधस्यो

५ तत्र च नन्मते दधि पश्यतीति स्थले मदधिपदोत्तर पश्यति पदत्वरूपा कांक्षास्ता
ग्रह राजसंबंधि नादिघटितसामग्री सत्वात् दधिकर्मकदर्शनान्वयस्यापत्तेः ६

व्यु०वा० भयमतसिद्धतया तादृशसमभिव्याहारस्य राजसंबंध्यभिन्नपुरुषबोधेकारणतायाः क्लृप्तत्वात्तयैव निर्वाहेण सर्वत्रालुप्तविभक्तिस्मरणकल्पने मानाभावात् ॥ न
च स्वारसिकलक्षणास्थले तादृशबोधस्योभयवादिसिद्धत्वेपि निरूढलक्षणामते संबंधितात्पर्यस्य अनादिकल्पनागौरवम् अनादितात्पर्यविषयभिन्नतार्थनिष्ठ
१३ लक्षणाया एव निरूढलक्षणात्वादिति वाच्यं । राजपुरुष इत्यादिवाक्यजन्यशाब्दबोधत्वेन नियमतो लुप्तविभक्तिस्मरणकल्पनापेक्षया तात्पर्यानादित्वक
ल्पनायां गौरवविरहादिति ॥ न चैवं दधिपश्यतीत्यादावपि दध्यादिपदस्य दधिकर्मकादौ लक्षणां स्वीकृत्य धात्वर्थेन समं तस्याभेदान्वयबोधोपपादनसंभवात्
तत्रापि लुप्तविभक्तिस्मरणकल्पनमनुचितमिति वाच्यम् ॥ दध्यादिपदस्य दधिकर्मकादौ लक्षणाग्रहदशायामपि तस्य द्वितीयेतरविभक्त्यंतत्वभ्रमदशायाम
पि दधिकर्मकात्मख्याति दधिकर्मकेन पश्यतीत्यादेरिवोक्तस्थलेपि दधिकर्मकदर्शनान्वयबोधानुदयात् विभक्त्याव्यवधानात् द्वितीयांत दध्यादिपदत्वावच्छि
न्नधर्मिकतादृशधात्वादिसमभिव्याहारज्ञानस्य तादृशान्वयबोधहेतुताया आवश्यकत्वात् ॥ दधिपश्यतीत्यादौ लुप्तद्वितीयानुसंधानस्यावश्यकत्वात् राजसंबं
धिपुरुषान्वयबोधेपि च राजादिपदाव्यवहितोत्तरपुरुषादिपदत्वप्रकारकज्ञानस्य हेतुतायाः स्वारसिकलक्षणास्थलानुरोधेनावश्यकल्पनीयतया राजपुरु
ष इत्यादौ राजादिपदस्य तृतीयाद्यंतत्वभ्रमदशायां राजसंबंधपुरुषाद्यन्वयबोधापत्त्यसंभवात् तृतीयादिविभक्त्याव्यवधानात् दधिपश्यतीत्यादौ दधिपदाव्यव १३
हितोत्तरत्वप्रकारकधातुपदज्ञानस्य हेतुताया अक्लृप्तत्वात् । पश्यति दधि पश्यति चैत्रो दधीत्यादावपि दधिकर्मकदर्शनान्वयबोधदर्शनात् तादृशहेतुताया अकल्प शक्य
नीयत्वाच्चेति ॥ तंडुलं पचतीत्यादि तंडुलादिपदस्यैव तंडुलादिकर्मके लक्षणा । विभक्तिस्तु साधुत्वार्थ एवं राजः पुरुष इत्यादावपि राजादिपदस्य संबंध्यादौ लक्ष

प्याविभक्तिः साधुत्वार्थं तत्र द्वितीयान्तसमभिव्याहारस्य तत्तल्लाक्षणिकार्थबोधनियामकत्वान्नातिप्रसंगः ॥ विभक्तेरेव प्रकृत्यर्थविशेषितस्वार्थे लक्षणेति तु न संभवति
विभक्तेः क्वापि शक्तेरकॢप्ततया तत्र शक्यसंबंधरूपलक्षणाया असंभवात् ॥ तंडुलः प्रमेय इत्यादौ विभक्त्यर्थामिश्रितस्यैव प्रकृत्यर्थस्याभानात् प्रकृतिशक्तेः स्वार्थे कॢ-
प्ततया तत्र लक्षणासंभवादिति तु चिंत्यम् ॥ राजादिपदस्य राजसंबंध्यादिशक्तत्वभ्रमदशायामिव तत्र लक्षणाग्रहदशायामपि राजसंबंधिनः पुरुष इत्यादाविव राजसं-
बंधिसंबंधी इत्यन्वयबोधस्य सर्वजनानुभवसिद्धत्वात् ॥ पचति देवदत्त इत्यादावपि कृतिसंबंधेन पाकादेर्देवदत्तादौ विशेषणत्वोपगमो न पचतीत्यादावन्वयबोधानु-
पपत्तिर्द्रष्टव्या ॥ कृतिसंबंधस्यापि वृत्त्यनियामकतया तत्संबंधावच्छिन्नप्रतियोगिताकाभावस्याप्रसिध्यात्तद्बोधनासंभवात् ॥ अथैवमपि देवदत्तो जानातीच्छतीत्यादौ
देवदत्तादौ धीज्ञानादेराश्रयतासंबंधेनान्वयबोधोपगमे क्षतिविरहः ॥ आश्रयतासंबंधस्याभावप्रतियोगितावच्छेदकतया न जानातीत्यादावाश्रयतासंबंधावच्छिन्नप्रतियोगि-
ताकज्ञानाद्यभावस्यैव भानसंभवात् ॥ तथा च तत्राख्यातस्याश्रयत्वार्थकत्वं निर्युक्तिकम् ॥ न च धात्वर्थज्ञानादेराश्रयतासंबंधेन देवदत्तादिरूपप्रातिपदिकार्थे साक्षात्प्रका-
रत्वोपगमे ज्ञानं चैत्र इत्यादावपि तथान्वयबोधापत्तिरिति वाच्यं ॥ तादृशान्वयबोधे आख्यातांतधातुसमभिव्याहारज्ञानस्य हेतुत्वाङ्कवतोप्याश्रयत्वाप्रकारकबोधे तादृ-
शसमभिव्याहारज्ञानस्य हेतुताया आवश्यकत्वात् ॥ यत्तु पचति यज्ञदत्त इत्यादौ पाककृतिमान् यज्ञदत्त इत्याकारकाख्यातार्थप्रकारकशाब्दबोधोत्पत्त्या तत्राख्यातजन्यकृत्यु-
पस्थितेर्हेतुत्वमावश्यकम् ॥ तथा च तत्तदर्थविशेषानुल्लिंगेनात्मनिष्ठप्रत्यासत्त्या पदार्थोपस्थितेर्हेतुत्वकल्पने शक्यलक्ष्यसहस्रार्थभेदेनाख्यातजन्योपस्थितेः कार-
णताबाहुल्यमित्यर्थविशेषाननिवेश्य धात्वर्थप्रकारकान्वयबोधं प्रति प्रत्ययजन्योपस्थितेः समानविशेष्यताप्रत्यासत्त्यैव हेतुत्वमुपेयते ॥ तथा च तादृशकारणबाधेन य

२ अन्यथा विपरीतादपि तिशादिति वा स्यात्ताद्बोधापत्तिः २

27

४ ज्ञातेत्यादौ तत्र चि ४ ५ तिङ्पदजन्योपस्थितिरूपं ५ ४ तिङ्पदजन्योपस्थित्यनुत्तरशाब्दबोधे ४ ४ अव्यवहितोत्तरत्वसंबंधेन ४

व्यु० वा० त्रदन्तादेर्धात्वर्थज्ञानादिविशेष्यतयाभानं न संभवति ॥ यदि च धातुलभ्यस्य यत्नादीनां दुर्निर्वचतया तादृशानुगतकार्यकारणभावकल्पनं न संभवतीति मन्यते ॥ तदापि यत्र
ज्ञादिधातोरेव पाकादौ लक्षणा तत्र जानातीति वाक्यात्पाककृत्यादिप्रकारकान्वयबोधोऽस्त्यास्तां धात्वर्थप्रकारकान्वयबोधे तदव्यवहितोत्तरतिङ्पदत्वप्रकारकज्ञानज
१४ न्योपस्थितेः समानविशेष्यताप्रत्यासत्त्या हेतुतायास्तत्र कल्पनीयतया तादृशकारणबाधाद्घटादेश्चैत्रादेर्ज्ञानादिविशेष्यतया भानानुपपत्तेर्दुर्वारत्वेवेति ॥ तदप्यसत् ॥ प्र
त्ययान्तरार्थविशेष्यकशाब्दबोधे व्यभिचारवारणाय तादृशोपस्थितेर्वैशिष्ट्यस्य तादृशोपस्थितिजन्यतावच्छेदककोटावश्यं निवेशनीयतया तदनुत्तरशाब्दबो
चैत्रो जानाति धे घटादेश्चैत्रादेर्विशेष्यतया भाने तादृशकारणबाधस्याकिंचित्करत्वात् ॥ तादृशानुपूर्वीघटकधातुजन्यज्ञानाद्युपस्थितिविषयघटचैत्रादिरूपविशेष्योपस्थितियोग्य
ताज्ञानादिघटितसामग्र्या आश्रयतासंसर्गकशाब्दबोधजनने बाधकाभावात् ॥ न चैतन्मते आश्रयतासंबंधेन ज्ञानप्रकारकशाब्दबोधे तादृशयोग्यताज्ञानहेतु
ताकल्पनाधिक्यम् ॥ आश्रयतासंबंधेन ज्ञानादिविशिष्टचैत्रादितात्पर्यकात्सर्वनाम्नः सांकेतिकशब्दान्तराद्वा तादृशसंबंधेन ज्ञानादिप्रकारकचैत्रादिविशेष्य
कशाब्दबोधस्य सर्वमत एव प्रसिद्धत्वादपि तादृशशाब्दबोधे पदार्थान्तरभाने नैयत्येन तन्निश्चितयोग्यताज्ञानस्य तत्र हेतुताया आवश्यकत्वात् ज्ञानादिविशिष्टचैत्रादि १५
मात्रविषयकयोग्यताज्ञानस्य ज्ञानादिविशिष्टचैत्रादिविषयकशाब्दबोधहेतुतायाः क्लृप्तत्वादिति वाच्यम् ॥ भवन्मतेऽपि ज्ञानाश्रयताप्रकारकचै
त्रादिविशेष्यकशाब्दबोधे तथाविधयोग्यताज्ञानहेतुताया आधिक्यात् ॥ आश्रयतासंसर्गकज्ञानकारणतावच्छेदकस्य तदीयसंसर्गकविषयताघटिततया
तत्प्रकारकज्ञानत्वरूपकारणतावच्छेदकापेक्षया लघुशरीरतया आश्रयतायाः संसर्गतामतस्यैव लघुत्वात् ॥ न च यत्राश्रयत्वे ज्ञाधातुसमभिव्याहृत

७ अकिंचित्करत्वादिति आख्यातस्य निरर्थकत्वादिमते तिङ्पदजन्योपस्थितेर ७ स्वीयमते कारणसामग्रीं प्रदर्शयति ॥ तादृशान्विति ७ ४ भवदुक्तमसंगतमत आह ज्ञानादीति ४
भावेऽपि ज्ञाधात्वर्थप्रकारकचैत्रादिविशेष्यकबोधउपपत्स्यते इति भावः ७

28

स्यातस्य शक्तिभ्रमः स्वारसिकलक्षणाग्रहो वा तत्प्रज्ञानाश्रयत्वप्रकारकशाब्दबोधस्योभयमतसिद्धततयातप्रतादृशयोग्यताज्ञानहेतुत्वमुभयका
दिसिद्धमेवेति वाच्यम् ॥ आश्रयतायाः संसर्गत्वघटितत्वात्तत्राप्याश्रयत्वप्रकारकबोधस्यानभ्युपगन्तव्यत्वादिति चेत्सत्यम् ॥ एतदभिप्रायेणैव
जानातीत्यादौ आख्यातस्य निरर्थकत्वं मणिकारैरुरीचकार । तत्राश्रयत्वे निरूढलक्षणामभ्युपगच्छतां दीधितिकाराणां पुनरेष आशयः ॥ मत्र ज्ञाधा
तो ज्ञानाश्रयत्वे शक्तिभ्रमः स्वारसिकलक्षणाग्रहो वा तत्र चैत्राद्युद्देश्यधात्वर्थैकदेशस्य ज्ञानादेरन्वयानुपपत्त्या स्वरूपसंबंधेन ज्ञानाश्रयताप्रकारकचै
त्रादिविशेष्यकान्वयबोध एव तत्र मणिकृतास्वीकरणीयः ॥ तत्र ज्ञानाश्रयताप्रकारकशाब्दबोधे तत्प्रकारकयोग्यताज्ञानहेतुतायाः क्लृप्तत्वादाश्रय
तासंसर्गकशाब्दबोधे तादृशयोग्यताज्ञानहेतुताकल्पनमाधिकमेव मणिकृन्मते ॥ न च दीधितिकृन्मते तादृशयोग्यताज्ञानहेतुताकल्पनेऽपि लाघवे
पि जानातीत्याद्यानुपूर्वीज्ञानघटितज्ञाधातुशक्तिज्ञानजन्योपस्थितिघटितसामग्र्याभिन्नविषयकप्रत्यक्षादिकं प्रति प्रतिबंधकतायां आतजन्योप
स्थितेर्निवेशाद्गौरवमेवेति वाच्यं ॥ भवन्मतेऽपि ज्ञानाश्रयत्वाभाववद्देवदत्तः कंटइत्यादिविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे जानातीत्याद्यानुपूर्वीघ
टितज्ञाधातुजन्योपस्थितिघटितसामग्र्याः प्रतिबंधकताधिक्येन गौरवात् ॥ मन्मते एतादृशशाब्दसामग्र्याविरोधिज्ञानाश्रयत्वाभाववत्तानिश्चय
घटिततथाविधविशिष्टवैशिष्ट्यबोधसामग्र्याः समं युगपदवस्थानासंभवेन तादृशप्रतिबंधकत्वकल्पनाविरहात् ॥ शेषं दर्शितदिशावसेयम्
रीत्या अथैवं भूतलेन घट इत्यादौ घटपदस्य घटप्रतियोगिकाद्यादौ तदुत्तरस्थविभक्तेरेव चाप्रतियोगितायां लक्षणामभ्युपेत्य तत्र घटप्रतियोगिकाभावो

सु०गा० भूतलं घटनिरित्याद्याकारकप्रतियोगिताप्रकारकशाब्दबोधोपगम एवोचितः॥ तथासति तथाविधसमभिव्याहारघटितसामग्र्या घटप्रतियोगिकत्वाभाववा
नभावः प्रमेयइत्यादिविशिष्टवैशिष्ट्यबोधप्रतिबंधकत्वाकल्पनेन लाघवादिरुक्तनियमे निपातातिरिक्तत्वविशेषणवैयर्थ्यमिति चेन्न॥ भूतले न घट इत्यादौ घटात्यं
१८ ताभावे भूतलाद्यन्वितसत्तान्यधर्माधेयत्वस्यैव तात्पर्यवशाद् घटादौ सत्तान्यधर्मे भूतलादिवृत्तित्वाभावस्याप्यन्वयबोधानुभवसिद्धेः॥ अन्यथा तादृशवाक्यजन्यबोध
स्याप्रामाण्यज्ञानानास्कंदितस्य भूतले घट इत्यादिवाक्यजन्यघटादिविशेष्यकभूतलाद्याधेयत्वप्रकारकबोधविरोधितायाः सर्वानुभवसिद्धायाः अनुपपत्तेः
नञ्पदं विना यत्र धर्मिणि यस्य विशेषणतया भानं तादृशसमभिव्याहाराद्भवति तादृशसमभिव्याहारस्थले नञ्सत्वे तत्र धर्मिणि तदभावः प्रतीयत इत्यनुभवा
पलापप्रसंगाच्च॥ एवं नञर्थाभावे अनुयोगितया घटान्वयबोधोपपत्तये निपातातिरिक्तत्वविशेषणमावश्यकं॥ एवं न पचति चैत्रः चैत्रस्य न धनमित्यादौ पाक
कृतिचैत्रस्वत्वाभावस्य नञर्थस्य चैत्रधनादौ अन्वयबोधोपपत्तये घटो न पट इत्यादौ नञर्थपटभेदस्यान्वयबोधोपपत्तये च तदावश्यकं॥ न चोक्तस्थले नञोभा
ववल्लाक्षणिकतया अभाववत्तासममनुयोगिनो अभेदान्वयबोध एव तत्रोपेयत इति वाच्यं॥ तथासति सर्वत्राभाववत एव नञर्थतया सर्वत्र मुख्यार्थपरनञो दुर्लभ
त्वापत्तेः॥ अभावस्याभेदान्वयबोधोपगमेपि कार्यकारणभावकल्पनाधिक्यविरहेप्यभाववति लक्षणानौचित्यात्॥ अभाववतो अभेदान्वयबोधोपगमे भूतले न १८
घट इत्यादिवाक्यजन्यबोधे भूतले घट इत्यादिवाक्यजन्यबोधस्य अविरोधितापत्तेश्च॥ लाघवात्स्वरूपसंबंधेन यात्वाभाव निर्णयस्यैव विशिष्टबुद्धिविरोधित्वात्

२ नीलतादात्म्याभाववान्घटः सुंदर इत्यादिविशिष्टवैशिष्ट्यावगाहिबोधं प्रति नीलो घट इत्यादिशाब्दसामग्र्याः प्रतिबंधकत्वाकल्पनादिति भावः ३ सर्वविशेषणविभक्तेः साधुत्वार्थकत्वे प्रयत्नछा
वित्वमपि गौरवग्रस्तमिति भावः २

श्रय नत्वभेदसंसर्गकप्रमात्वाभावप्रकारकनिश्चयस्येति ॥ नीलो घट इत्यादौ विशेषणविभक्तेरभेदार्थकत्वमतेपि यद्यप्युक्तरीत्या लाघवं संभवति तथापि न तत्र नो विद्वेष
इतिदिक् ॥ प्रत्ययाश्च विभक्तिस्तद्धितादिभेदेन नानाविधाः ॥ विभक्तिश्च सुप्तिङ्भेदेन द्विधा ॥ सुविभक्तयः प्रथमाद्वितीयाद्याः सप्त तत्र प्रथमार्थः प्रकृत्यर्थे विशे
षणविधयाऽन्वयिनी संख्यैव ॥ अतएव यत्र विशेष्यवाचकं समानविभक्तिकं पदं निपातपदं वा नास्ति तत्र प्रथमार्थस्य विशेष्यवाचकसामग्र्यभावात्सो मुख्यवि प्रथमार्थार्थ
शेष्यतया भासते संख्यावाचकानामेकवचनद्विवचनबहुवचनादीनामेकत्वत्वद्वित्वत्वबहुत्वत्वावच्छिन्ने शक्तिः ॥ शक्ततावच्छेदकत्वं चैकत्वत्वादिना न तु सुप्तिङ्सा
धारणैकवचनत्वादिना एकवचनत्वादेर्दुर्निर्वचत्वात् ॥ न चैकत्वादिबोधकत्वं तत् ॥ तथा चैकतायाः शक्ततारूपत्वे आत्माश्रयप्रसंगात् ॥ बोधकतारूपत्वे चे
शक्तिभ्रमेण द्विवचनादीनामप्येकत्वबोधकतया अतिप्रसंगात् ॥ न चैकवचनत्वादिकं जातिविशेषः ॥ सत्त्वादिना संकरात् ॥ न च शक्तिसंबंधेन एकवच
नादिपदवत्त्वं तत् तदज्ञाने तादृशायां च सत्त्वादिना शक्तिभ्रमादेव शाब्दबोधः ॥ एकवचनादिपदस्य पदद्वयात्मकतया तादृशसमुदायशक्तिरेवाप्रसिद्धेरिति
नाशंकनीयम् ॥ एकं वक्तीत्यादिव्युत्पत्त्या एकवचनादिशब्दस्य स्वादिबोधकत्वे एकादिशब्देपि तादृशव्यवहारापत्तेः ॥ एकवचनादिशब्दस्य स्वादौ रूढिस्वी
स्यावश्यक कारादितिवाच्यम् । ग्रंथकारीयसंकेतेनैवोपपत्तौ एकवचनादिपदशक्तेरप्रामाणिकत्वात् ॥ तान्येकवचनद्विवचनबहुवचनान्येकश इत्यादिपाणिनीयसूत्र
स्य तदीयसंकेतपरत्वस्याप्युपपत्तेः ॥ न हि यू स्त्र्याख्यौ नदीत्यनुशासनात्स्त्र्याख्येईदूदंतादिशब्दे नदीपदस्य शक्तिः सिध्यति ॥ किंतु तदीयसंकेत एव ॥ अत
एव नद्यादिसंज्ञा आधुनिकसंकेतशालित्वात्पारिभाषिक्य एव न त्वौपाधिक्यः ॥ अथैवमपि पाणिनिसंकेतसंबंधेन तादृशपदवत्त्वमेव एकत्वादिशक्तता

५ शक्तताया एव शक्ततावच्छेदकत्वापत्तेरिति भावः ५

31

५ पदार्थद्वयसंसर्गभानस्यैवाकांक्षासादिति नियम्यत्वादिति भावः ५

व्यु० वा० वच्छेदकमस्त्विति चेत् ॥ तादृशसंकेतस्य केन रूपेण संबंधता संकेतत्वेन चेत्तर्हि कस्यचित्पुंसः एकवचनादिपदादौजसादिबोद्धव्य इत्याकारकसंकेतस्यापि संभवादतिप्र
सक्तिरीश्वरैव ॥ पाणिनिसंकेतत्वेन तथेति चेत्तर्हि व्याकरणप्रणेतुः पुरुषांतरस्यापि तादृशसंकेतसंभवात्तदीयसंकेतसंबंधेन तत्पदवत्त्वस्य ङिसादिपदस्यौ
॥ ९८ ॥ जसादिबोद्धव्य इत्याकारकपुरुषविशेषसंकेतसंबंधेन ङिसादिपदवत्त्वस्य चाविनिगमनाविरहेण एवंधर्मशक्ततावच्छेदकत्वमसंगः तथा चागत्यानुपूर्वीविशे
षएव शक्ततावच्छेदक इति ॥ यत्तु संख्यापि प्रकृतेरर्थः । एकवचनादिकं त्वेकत्वाद्यर्थतात्पर्यग्राहकमेव ॥ न चैकप्रकृत्युपस्थाप्ययोरर्थयोः परस्परान्वये आकां
क्षाविरहात् घटादावेकत्वान्वयानुपपत्तिः ॥ अन्यथा घटादिपदादुपस्थितयोर्घटघटत्वयोराधाराधेयभावेनान्वयापत्तेः ॥ घटादिपदस्य एकत्वादिविशिष्टघटादौ च
न शक्तिसंभवः ॥ घटरूपं पश्येत्यादौ संख्यानवच्छिन्नघटादेरेव बोधनादिति वाच्यम् ॥ आकांक्षावैचित्र्यादेकप्रकृत्युपस्थाप्ययोरपि घटैकत्वयोः परस्परमन्वयसं
भवात् ॥ अत एव खंडशक्त्यैव एवकाराद्युपस्थाप्ययोरन्ययोगव्यवच्छेदयोः परस्परमन्वयबोधः ॥ न चैवं कर्मत्वादिकमपि प्रकृत्यर्थ एवास्तु किं तत्र द्वितीयादिशक्त्येति
वाच्यम् ॥ नामार्थधात्वर्थयोः साक्षाद्भेदान्वयबोधस्याव्युत्पन्नतया कर्मत्वादेर्नामार्थत्वे तेन सम धात्वर्थान्वयासंभवात् ॥ न च संख्यायाः प्रातिपदिकार्थत्वे सति ता ॥ ९८ ॥
त्पर्यज्ञाने विनैव शक्तिभ्रमं लक्षणां चाहं द्विवचनाद्यंतपदादेकत्वबोधसंभवात् । एकत्वादितात्पर्येण एकवचनांतस्येव द्विवचनाद्यंतस्यापि पदस्य स्वारसिकप्र
योगापत्तिरिति वाच्यम् ॥ अनादितात्पर्यस्य स्वारसिकप्रयोगमूलत्वात् ॥ एकवचनाद्यंतपदस्यैव एकत्वाद्यवनादितात्पर्योपगमेनातिप्रसंगविरहात् ॥ द्व्येकयो
र्द्विवचनैकवचने इत्याद्यनुशासनं च तादृशार्थतात्पर्यग्राहकमेवेति वैयाकरणमतम् ॥ न दसत् ॥ अनंतानां प्रकृत्यानुपूर्वीणां शक्ततावच्छेदकत्वापेक्षया अल्पत

५ कल्प्यत इति लाघवात्प्रकृत्यानुपूर्वीनां संख्यावाचकतावच्छेदकत्वं कुप्येयते इति चेत् आकां
क्षाविचारे समभिव्याहारज्ञानहेतुता ५

र्विभक्त्यानुपूर्वीणां एकत्वादिशक्ततावच्छेदकत्वस्यैवोचितत्वात् ॥ न च प्रातिपदिकत्वमेव शक्ततावच्छेदकम् न तु घटपटत्वादिकमिति न शक्यानन्त्यमिति वाच्यम्
प्रातिपदिकत्वस्य दुर्वचत्वात् ॥ तदज्ञानेऽपि एकत्वादिबोधस्य अनुभवसिद्धत्वात् ॥ पदत्वेन वर्णत्वेन वा शक्तत्वे विभक्तेरपि तथा च कतासिद्धेः ॥ एकत्वादिशाब्दबोधा
त्पूर्वं वर्णत्वाद्यनुपस्थितेरनावश्यकत्वाच्च फलानुरोधेन तत्कल्पने च गौरवात् ॥ एवमानुपूर्वीभिन्नधर्मस्य वाचकतावच्छेदकत्वे घटपदस्थपदं च न संख्यावाच
कमिति विपरीतनिश्चयकालेऽपि तादृशधर्मावच्छिन्नस्य वाचकताग्रहसंभवात् घट इत्यादौ संख्यायाः बोधापत्तिः ॥ अथ विभक्तीनां संख्यार्थकत्वमते प्रकृतिविभ
क्त्योरेकवाक्यताविरहनिश्चयदशायां विभक्त्युपस्थाप्यैकत्वस्य प्रकृत्यर्थेऽन्वयबोधवारणाय तयोः समभिव्याहारज्ञानस्य घटादिविशेष्यकैकत्वाद्यन्वयबोधं प्रति
कारणत्वमधिकं कल्पनीयम् ॥ एकपदोपस्थापितयोर्घटैकत्वाद्योरन्वयबोधोपगमे च न समभिव्याहारज्ञानस्य हेतुतायाः निराकृतत्वात् ॥ अथैवमपि विभक्तेः संख्या
र्थकत्वे विनिगमनाविरहेण प्रकृतिधर्मिकस्य विभक्तिधर्मिकस्य च संख्याप्रकारकान्वयबोधपरत्वज्ञानस्य हेतुता कल्पनीया ॥ विभक्तेर्द्योतकत्वे तु विभक्तौ तात्पर्यवि
रहेण प्रकृतिधर्मिकमेव तात्पर्यज्ञानं तादृशान्वयबोधहेतुरिति चेत् विभक्तेः संख्यावाचकत्वविरहेऽपि प्रकृतिविभक्त्योरानुपूर्वीज्ञानस्य तादृशान्वयबोधहेतुता
या निर्विभक्तिकेकादिपदादन्वयधीवारणायावश्यं कल्पनीयतया संख्यावाचकप्रकृतेरिव तद्वाचकविभक्तेरपि संख्यान्वयबोधकत्वप्रकारकेच्छाविषयत्वरूपता
दृशबोधपरत्वसंभवेन विभक्तिधर्मिकतादृशज्ञानहेतुतायाः विनिगमनाविरहादावश्यकत्वात् ॥ अथ स्वादीनां संख्यावाचकत्वकल्पनापेक्षया प्रकृतौ तत्र ल
क्षणैवोचिता ॥ शक्यलक्ष्ययोः परस्परान्वयोपगमेऽक्षतिविरहात् ॥ प्रथमाविभक्तेः कुत्रापि शक्तेरस्वीकृततया तस्याः शक्यसम्बन्धरूपलक्षणा न संभवति ॥

व्यु॰ पा॰ द्वितीयादेः कर्मत्वादौ शक्तत्वेपि तादृशविभक्तेस्तत्समभिव्याहृतप्रकृतेर्वा संख्यायां लक्षणाद्रत्यन्तविनिगमकदुर्लभं ॥ न चैकत्वाद्यन्वयबोधे घटादिपदजन्योपस्थि-
तित्वेनानन्तहेतुताकल्पनामपेक्ष्य स्वादिपदजन्यतदुपस्थितित्वेन कतिपयहेतुतायां कल्पनालाघवात् ॥ कतिपयशक्तिकल्पने गौरवमकिंचित्करम् सामान्यत-
१७ पदवृत्तिज्ञानजन्यतदुपस्थितित्वेनैककारणताकल्पनं न सम्यक् ॥ निर्विभक्तिककुंभपदादितः संख्योपस्थितौ तादृशहेतुतानिरूपकघटादिपदेतराद्विनियतत्वज्ञानव-
तः पुंसो घटादौ संख्यान्वयबोधप्रसंगात् ॥ घटपदादिज्ञानजन्यैकत्वाद्युपस्थितित्वेन एकत्वादिविषयकशाब्दबोधहेतुताकल्पनेपि तादृशविभक्तिपरघटादिपदानुपू-
र्वीज्ञानतादृशोपस्थित्योः परस्परसहकारेण फलजनकताया अवश्याभ्युपेयत्वादिति वाच्यम् घटादिपदस्यैकत्वादौ लक्षणाप्रसरसत्वे भट्टः प्रमेयमित्यादिवाक्या-
देकत्वं प्रमेयमित्याद्यन्वयबोधस्य सर्वमतसिद्धतया तदनुरोधेनैकत्वादिविषयकशाब्दबोधे घटादिजन्यैकत्वाद्युपस्थितित्वेन हेतुतायाः सर्वसंमतत्वात् मैवम् ।
यादृशयादृशपदानां लक्षणया एकत्वादिशाब्दधीजनकत्वं तोभयवादिसिद्धं तादृशानन्तघटादिपदज्ञानजन्यैकत्वाद्युपस्थितीनां तत्तच्छाब्दबोधहेतुताकल्पनं प्रकृ- १७
तेः संख्यावाचकतावादिनामधिकमिति तत्कल्पनापेक्षया अभ्यन्तरस्वादिपदज्ञानजन्यैकत्वाद्युपस्थितिहेतुताकल्पने एव लाघवम् ॥ एतेन संख्याविशेषावच्छिन्न
घटादिर्लक्षणया प्रकृतेरर्थः न तु संख्याविभक्त्यर्थः ॥ शाब्दबोधे विभक्तिजन्यसंख्योपस्थितिहेतुताकल्पनाधिक्येन गौरवात् ॥ घटादिपदस्यैकत्वादिविशिष्टघट ॥राम॥
दौ लक्षणाग्रहदशायां सर्वमतएव तज्जन्यतद्विशिष्टविषयकोपस्थित्या विशिष्टविषयकशाब्दधीजननात्तथाविधोपस्थितिहेतुतायाः सर्वानुमतत्वात् पदान्तरास-
मभिव्याहृतघट इत्यादितः शाब्दादेकत्वादिविशिष्टशाब्दबोधस्त्वलीक एव ॥ तद्विषयकस्मरणस्य तत्रोपगमात् ॥ तथा चोक्तं सर्वं वाक्यं क्रियायां परिसमाप्यत इति त-

34

दपीति रक्तम्। यादृशपदानां लक्षणया एकत्वादिविशिष्टस्वार्थबोधहेतुत्वं नोभयवादिसिद्धम्। तादृशानंतपदजन्यविशिष्टोपस्थितीनां शाब्दबोधीहेतुत्वकल्पने म-
पेक्ष्य विभक्तिजन्यसंख्योपस्थितीनां अल्पानां तत्कल्पने लाघवात्॥ इदं पुनरवधेयम्॥ विभक्तेः संख्याबोधकत्वे समानविषयकानुमित्यादिकं प्रति शाब्दसामग्रीप्र-
तिबंधकतायां प्रातिपदिकजन्यपदार्थोपस्थितिर्विभक्तिजन्यसंख्योपस्थितिश्च निवेश्या। तयोर्मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण प्रतिबंधकताबाहु-
ल्यं प्रसक्ते विशिष्टलाक्षणिकत्वमते तदुभयस्थलीयविशिष्टविषयकोपस्थितिरेकैव सामग्र्यामंतर्भवतीति लाघवम्। न च विशिष्टविषयकोपस्थितेरप्येकत्वादि-
प्रकारतानिरूपितघटादिविशेष्यताशालित्वेन घटादिविशेष्यतानिरूपितैकत्वादिविषयताशालित्वेन वा प्रवेश इति विनिगमनाविरहेण साम्यमिति वाच्यम्। प्र-
त्वन्मते योग्यताज्ञानघटोपस्थित्येकत्वाद्युपस्थितीनां तिसृणां विशेष्यविशेषणभावविनिगमनाविरहेण यत्र प्रतिबध्यप्रतिबंधकभावषट्कं मन्मते तत्र योग्य-
ताज्ञाने विशिष्टविषयकोपस्थितेः प्रत्येकं दर्शितोभयरूपेण वैशिष्ट्यं निवेश्यमिति तदुभयम् प्रत्येकं तादृशरूपद्वयावच्छिन्नायामुपस्थितौ योग्यताज्ञानस्य वैशिष्ट्यं
निवेश्यमिति तदुभयम् द्वयं कल्पनीयमिति तच्चतुष्टयमात्रमिति रीत्या अस्माकं त्वल्पतरकल्पनेन महालाघवम्। इत्थं रीत्यैव प्रणमतीत्यादौ प्रकर्षविशिष्टनतिर्धा-
त्वामेनार्थः॥ प्रादयो द्योतका एव न तु प्रकर्षादिवाचका इति सर्वानुमतः पंथाः परिष्कर्तुं शक्यते। अन्यथा नंतधातुजन्यप्रकर्षादिविशिष्टनत्या स्वार्थोपस्थिती-
नां तज्जनकताकल्पनमपेक्ष्य कतिपयोपसर्गाधीनप्रकर्षाद्युपस्थितीनां तज्जनकताकल्पने लाघवात्। स्वादिनामिव प्रादीनां वाचकता निराबाधेति॥ संख्या-
याश्च प्रकृत्यर्थे पर्याप्तिसंबंधेनैव विशेषणत्वं न तु समवायादिना तथा सति एकव्यक्तिमात्रबोधपराद्घटाकाशशब्दादपि द्विवचनबहुवचनाद्यापत्तेः। तत्तदर्थ-

व्यु० वा० योर्द्वित्वबहुत्वयोः समवायादिना आकाशाद्यन्वयायोग्यत्वात्॥ नचपर्याप्तेः संसर्गत्वेपितद्दोषतादवस्थ्यम् घटाकाशादौद्वित्वादेः पर्याप्तिसत्वेप्रत्येकमाकाशादौपर्याप्ति
र्नास्तीत्यस्यवक्तुमशक्यत्वात् प्रत्येकस्योभयानतिरिक्तत्वादितिवाच्यम्॥ उद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तेरेवसंसर्गत्वोपगमात्॥ आकाशत्वादिव्याप्यतायाद्वि
त्वादिपर्याप्तावसत्वेनातिप्रसंगविरहात्॥ वैशिष्ट्यंचवैज्ञानिकंनतुवास्तवम्॥ तेनद्वित्वयोग्यताभ्रमजन्यो यत्राकाशावित्यादिवाक्यजन्यद्वित्वादिप्रकारकाकाशबोध
१८ स्तत्रविशिष्टसंसर्गाप्रसिद्धावपिनक्षतिः॥ द्वित्वादिपर्याप्तावन्यत्राप्रसिद्धस्याकाशत्वादिव्याप्यत्वस्यभ्रांतेस्तत्रोपगमात्॥ संबंधतावच्छेदकांशेअन्यत्रभ्रमत्वस्योपपा
दितत्वात्॥ नचप्रकृत्यर्थतावच्छेदके एवव्यापकतासंबंधेनद्वित्वान्वयधीः किंनोपेयत इतिवाच्यम् घटौद्वावित्यादौ घटत्वादिनास्वरूपतएवोपस्थिततयातत्रेतरान्वयबोधा
संभवात्॥ स्वव्यापकीभूतोद्देश्यतावच्छेदकवत्त्वरूपपरंपरयाएवप्रकृत्यर्थेद्वित्वादेः संबंधत्वेनव्यापकतारूपसंबंधतावच्छेदकत्वांशेभ्रमत्वस्वीकारस्यावश्यकतयो
द्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तेः संसर्गतोपेक्षानिर्बीजा॥ अथात्रव्याप्तिर्व्यापकसामानाधिकरण्यरूपैववाच्या॥ नतुतद्वदन्यावृत्तित्वरूपा केवलान्वयिधर्मस्य
प्रकृत्यर्थतावच्छेदकत्वंयत्रतत्राप्रसिद्धेः॥ एवंचोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्त्यपेक्षयालघोः स्वव्यापकतादृशधर्मवत्त्वस्यैवसंबंधत्वमितिचेत्तर्हिआकाशोनद्वा १८
वित्यादिवाक्यजन्यशाब्दबोधदशायामप्याकाशावित्यादिवाक्याद्द्वित्वबोधापत्तिः॥ तथाहि॥ आकाशोनद्वावित्यादितः द्वित्वावच्छिन्नभेदः प्रतीयतेसचनस्वव्यापका
काशत्वादिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकः तादृशसंबंधेनद्वित्ववतोऽप्रसिद्धेः॥ अपितुपर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकः एवंचपर्याप्तिसं
बंधेनद्वित्वविशिष्टबुद्धिरेवप्रतिबध्यतेनतूक्तपरंपरासंबंधेनतद्विशिष्टबुद्धिरपीति॥ अथाकाशोनद्वावित्यादिकेवलपर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताक

36

भेदेनआबोधयितुंनशक्यते। आकाशेप्युक्तयुक्त्याद्वित्वपर्याप्तेःसत्वेनतत्रतेनसंबंधेनतद्भेदस्यवक्तुमशक्यत्वात्॥ आकाशत्वव्याप्यपर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकद्वित्वादिमद्भेदस्याप्रसिद्धेरेवेतिचेन्न। द्वित्वादिपर्याप्तेरुभयादिवृत्तिधर्मेणावच्छेदात्॥ तदनवच्छेदकैकमात्रवृत्तिधर्मावच्छेदेनतद्भेदस्यतेनसंबंधेनद्वित्वादिमतोभेदस्यचतद्वृत्तिरनोबाधकाभावात्॥ नन्वेवंघटपटयोर्नद्वावित्यपिप्रयोगआपद्येतघटपटयोरपिप्रत्येकंद्वित्वावच्छिन्नभेदसत्वादितिवाच्यम् द्विवचनाद्युपस्थापितद्वित्वावच्छेदेनद्वित्वावच्छिन्नभेदस्यबाधेनतादृशप्रयोगानुपपत्तेः॥ ननुव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदउद्देश्यतावच्छेदकावच्छेदेनैवबोध्यतइतिव्युत्पत्तेर्द्वित्वसामानाधिकरण्येनतद्बाधस्याकिंचित्करत्वात्॥ नचघटत्वादेरतिप्रसक्ततयाद्वित्वादिपर्याप्तेरनवच्छेदकत्वात्तदवच्छेदेनद्वित्ववद्भेदस्यप्रवतामप्यनुमतत्वात्प्रकृत्यर्थगतैकत्वाविवक्षायांघटेनद्वावित्यादिप्रयोगापत्तिरितिवाच्यम्॥ तादृशप्रयोगाभावेघटत्वादेर्द्वित्वादिपर्याप्तेरिवद्वित्वादिमद्भेदस्याप्यनुयोगितायाअवच्छेदकतायाअप्रामाणिकत्वात्॥ प्रतियोगितावच्छेदकानवच्छेदकतायामेवावच्छेदकतानियतत्वासिद्धेः॥ अस्तुवातिप्रसक्तोपिघटत्वादिर्द्वित्वपर्याप्तेरवच्छेदकः॥ घटौद्वावित्यादिप्रतीतिबलात्॥ वस्तुतस्तुघटत्वादेःद्वित्वपर्याप्त्यनवच्छेदकत्वेपिद्वित्वपर्याप्तित्वावच्छिन्नानतिप्रसक्ततयातदवच्छिन्नावच्छेदकत्वमव्याहतमेव॥ अथपर्याप्त्याख्यविलक्षणसंबंधएवाप्रामाणिकः॥ तत्कथंतत्संबंधता॥ आकाशोनद्वावितिप्रतीतिस्तुसमवायसंबंधावच्छिन्नप्रतियोगिताकभेदविषयकैवास्ताम्॥ आकाशादेर्द्वित्वादिसमवायसत्वेपिद्वित्वादावेवउभयादिवृत्तिधर्ममात्रावच्छिन्नत्वोपगमात्तद

व्यु॰वा॰ नवच्छेदकाकाशत्वाद्यवच्छेदेन समवायसंबंधेन तद्वतोभेदस्य वृत्तौ बाधकाभावादिति चेन्न ।। आकाशवित्यादिवाक्यजन्यशाब्दबोधस्याप्रमात्वानुपपत्तेस्तादृशसं
बंधासिद्धेः ।। तादृशबुद्धेः समवायविषयकत्वे प्रमात्वनिराकरणस्याशक्यत्वात् ।। उद्देश्यतावच्छेदकव्याप्तिविशिष्टसमवायस्य संसर्गतोपगमे घटावित्यादिवाक्यस्याप्य
३९ प्रमाणतापत्तिः ।। समवायस्यैक्येन घटादिनिष्ठस्य द्वित्वादिसमवायस्य पटादावपि सत्त्वेन घटत्वाद्यव्याप्यत्वात् ।। न चोद्देश्यतावच्छेदकव्याप्यद्वित्वादिसमवायत्वेनैव
संबंधतास्तु । द्वित्वादिसमवायस्य घटत्वाद्यव्याप्यत्वेपि द्वित्वादेस्तद्व्याप्यतया न घटावित्यादेरप्रमाणतेति वाच्यम् । एवं सति तथाविधद्वित्वादेरेव लाघवेन द्वि
त्वादिसंबंधतौचित्यात् ।। अथास्त्वेवमेवं तावतापि पर्याप्तिसंबंधस्य विलयादिति चेन्न ।। द्वित्वादिस्वरूपस्यैव द्वित्वादिपर्याप्तितयाभिमतासिद्धेः ।। उक्तं च दी
धितिकृता ।। पर्याप्तिश्चायमेको घट इमौ द्वावित्यादिप्रतीतिसाक्षिकः स्वरूपसंबंधविशेष इति ।। समवायस्य नानात्वमते च द्वित्वादिसमवाय एव तत्पर्याप्ति
र्न तु स्वरूपमतिरिक्तपदार्थो वेत्यन्यदेतत् ।। यत्तु आकाशं न द्वे इत्यादिप्रतीतिवदाकाशं न द्वित्ववदिति प्रतीतेः प्रमात्वस्य वारणाय समवायेन द्वित्वादिम
द्भेद आकाशत्वावच्छेदेन न स्वीकर्तव्यः ।। तथा च पर्याप्तेरविलक्षणत्वे आकाशं न द्वे इत्यादिप्रतीतेरप्यप्रमात्वापत्तिरिति तन्न ।। आकाशं न द्वित्ववदिति प्रती ।।३९।।
तौ द्वित्वसमवायावच्छिन्नभेद एव विषयः मतुपा संबंधस्योल्लेखात् ।। न तु द्वित्वाद्यवच्छिन्नभेदः एवं चाकाशत्वाद्यवच्छेदेन द्वित्वाद्यवच्छिन्नभेद एव स्वीक्रिय
ते ।। न तु तत्संबंधावच्छिन्नभेद इत्याकाशं न द्वे इति प्रतीतेरप्रमात्वस्याकाशं न द्वित्ववदिति प्रतीतेश्चाप्रमात्वस्य न प्रसंग इति ।। अथोद्देश्यतावच्छेदकव्याप्यप
र्याप्तेर्द्वित्वादिसंबंधत्वे घटवत्खदिरौ छिनत्तीत्यादावुद्देश्यतावच्छेदकीभूतघटत्वखदिरत्वाद्यव्याप्यं द्वित्वादिद्वयमेव प्रत्येतव्यम् न तु घटत्वखदिरादिपर्याप्त द्वि

38

त्वादिकं तथा चैकैकधवखदिरादितात्पर्येण तथाप्रयोगानुपपत्तिरिति द्वित्वान्वयितावच्छेदकं अपेक्षाबुद्धिविशेषविषयत्वादिरूपमुभयादिनिष्ठं साहित्यं द्वंद्वसमासार्थो वाच्यस्तथा च मीमांसकमतप्रवेश इति चेन्न ।। यत्रैकधर्मस्य द्वित्वाद्युद्देश्यतावच्छेदकता तत्रैवोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तेः संसर्गतानियमः यत्र धर्मद्वयादेस्तथात्वं तत्र केवलापर्याप्तिः ।। समवाय एव वा संसर्ग इत्यपगमात् ।। धिनैव साहित्यस्यान्वयितावच्छेदकताया एकैकतात्पर्येण धवखदिरावित्यादिप्रयोगोपपत्तेः ।। न चैवमेकैकधवखदिरादितात्पर्येणापि धवौ खदिरावित्यादिप्रयोगापत्तिः ।। तादृशवाक्यद्वयविषयकसमूहालंबनजन्यसमूहालंबनशाब्दबुद्धेर्नानाधर्मावच्छिन्नोद्देश्यताकतया शुद्धपर्याप्तेरपि संसर्गतयाऽवगाहनसंभवादिति वाच्यम् ।। यत्र नानाधर्मावच्छिन्नविशेष्यतानिरूपिता एका द्वित्वादिप्रकारता तत्रैव शुद्धायाः पर्याप्तेः समवायस्य वा संसर्गतया भानात् ।। धवौ खदिरावित्यादिनानावाक्यजन्यसमूहालंबनशाब्दबोधे विशेष्यताभेदेन प्रकारताभेदेन च उद्देश्यतावच्छेदकधर्मताद्व्याप्तिविशिष्टपर्याप्तेः संसर्गतानियमेन एकैकधवखदिरादितात्पर्येण तथाप्रयोगासंभवात् धवखदिरावित्यादिसमासोत्तरद्विवचनेन धवत्वखदिरत्वाद्यवच्छिन्ननानाविशेष्यतानिरूपितैकद्वित्वादिप्रकारताशालिज्ञानमेव जन्यते । तादृशवाक्यजन्यबोधस्य समूहालंबनानात्मकतया विशेष्यताभेदेन प्रकारताभेदाभावात् ।। यथा हि समूहालंबनानात्मके खड्गी चैत्रः कुण्डलीत्याकारकनानाविशेषणकैकविशेष्यकज्ञाने नानाप्रकारतानिरूपिता एका विशेष्यता तथाविधधवखदिरावित्याकारकेनानाविशेष्यकैकविशेषणकज्ञाने विशेष्यताभेदेऽपि भिन्नैव द्वित्वादिप्रकारता ।। अन्यथा समूहालंबनतः तद्वैलक्षण्यानुपपत्तेः ।। समासघटकधवखदिरादिपदसमानैकवाक्यतानुपपत्तिश्च । तत्र योऽन्यविषयतया साक्षात्परंपरया वा निरूपिता

व्यु० वा० मा विषयतातत्स्ययोजकत्वस्यैव तदेकवाक्यतापदार्थत्वात् ।। न चैतादृशैकवाक्यताविरहेऽपि [illegible]ति विरहः ।। तथासति समासस्यैवानुपपत्तिः ।। अयमेति पुत्रो राज्ञः पुरु
षोपसार्यतामित्यादौ राजपदपुरुषपदादीनां समासवारणाय समर्थपदानामेव समासानुशासनात् ।। सामर्थ्यस्य च निरुक्तैकवाक्यतारूपत्वात् ।। जलपृथिव्योः स्नेह
२० गंधावित्यादावपि न जले स्नेहः पृथिव्यां गंध इत्याकारकः समूहालंबनो बोधः ।। किंतु तद्विलक्षणो द्वित्वादिनिष्ठैकप्रकारतानिरूपितजलत्वपृथिवीत्वाद्यवच्छिन्नवि
शेष्यतात्मकप्रकारताद्वयनिरूपिताधेयत्वप्रकारतानिरूपितं यदुभितावच्छेदकद्वित्वादिनिष्ठैकप्रकारतानिरूपकं स्नेहत्वगंधत्वाद्यवच्छिन्नविशेष्यताद्वयं तद्व
त्त्विति अतो न कुत्राप्येकवाक्यताभंगः ।। चैत्रो मैत्रश्च गच्छत इत्यादावाख्यातार्थद्वित्वादिप्रकारेण भासमाने चैत्रमैत्रोभयमात्रे गमनाश्रयत्वाद्यन्वयेनानिरुक्तैक
वाक्यतासंभवेऽपि समासविधेर्विभाषाधिकारीयत्वादसमासः ।। तत्र विशेष्यताभेदेऽपि न द्वित्वनिष्ठप्रकारताद्वयप्रतियोगी समूहालंबनम् इति तु न सम्यक् ।। तथास
त्युक्तयुक्त्याऽनैकैकचैत्रमैत्रादितात्पर्येण तथा प्रयोगानुपपत्तेः ।। आख्यातोपस्थापितद्वित्वादिकं चोभयादिरूपान्वयितावच्छेदकावच्छिन्न एवान्वेतीति व्युत्प २०
त्तिः ।। तेनोक्तप्रयोगदर्शनात् क्रियापदस्य विशेष्यवाचकपदसमानवचनत्वानियमेऽपि घटद्व्यादितात्पर्येण घटस्तिष्ठत इत्यादयो न प्रयोगाः ।। एकवचनांतं कि
यापदं च तादृशविशेष्यवाचकपदप्रयोग एव साधु अतो घटास्तिष्ठतीत्यादयो न प्रयोगाः ।। अथैकघटादिव्यक्तेस्तद्देशवृत्तितादशायां अत्र घटोऽस्ति घटाः संती
ति कथं न प्रयोगाः ।। घटादौ घटत्वादिव्याप्तिविशिष्टपर्याप्तिसंबंधेन द्वित्वादेस्तद्देशवृत्तित्वाश्रयत्वादेश्च सत्त्वात् ।। न च द्वित्वेनोपस्थितयोर्द्वयोरेव व्यक्त्योरेवं
बहुत्वेनोपस्थितासु बहुषु व्यक्तिषु विधेयान्वयात् व्यक्त्यंतरेष्वेतद्देशवृत्तित्वाश्रयत्वादिबाधान्न तादृशप्रयोग इति वाच्यम् ।। व्यक्त्यंतरेऽयोग्यतया तादृशाधि

धेयानवगाहिनः एकघटे तदवगाहिनो बोधस्योत्पत्तौ बाधकाभावात् तथा तात्पर्येण तथाप्रयोगस्य दुर्वारत्वात्॥ न च व्यासज्यवृत्तिधर्मो यत्रान्वयितावच्छेदकः तत्र याव
त्स्वन्वयितावच्छेदकपर्याप्तिस्तावतामेव पदार्थांतरेषामन्वये व्युत्पत्तिस्तन्निर्वाहाय तादृशधर्मावच्छिन्नेतरान्वयबोधजनकसामग्र्या उभयादिविषयकपदार्थांतरा
न्वये स्वबुद्धित्वमेव जन्यतावच्छेदकं वक्तव्यमिति द्वित्वादिनैकघटादिमात्रविषयकैतादृशव्युत्पत्तिलाघवान्वयबोधो न संभवतीति तु तादृशबोधतात्पर्येण तादृशप्रयोगप्रसक्ति
रिति वाच्यम्॥ योग्यताभ्रमेण आकाशावत्रस्त इत्यादिवाक्यात् द्वित्वादिना एकव्यक्तिमात्रविषयकपदार्थांतरान्वयबोधात् तादृशव्युत्पत्तेस्तन्निर्वाहके कार्यकार
णभावस्य कल्पनासंभवात्॥ यत्तु द्वित्वावच्छिन्नोद्देश्यताकबुद्धौ उद्देश्यतावच्छेदकव्यापकतानियमो तो विधेयसंसर्गे भासत इति व्युत्पत्तिः॥ यत्र चोद्देश्यतावच्छेद
कविशिष्टाधिकरणाप्रसिद्ध्यात् तद्व्यापकत्वमप्रसिद्धम् तत्रापि खंडशः प्रसिद्धानां तद्घटकपदार्थानां विशेष्यविशेषणभावापन्नानां भानसंभवान्न पीतशंखावत्रे
त्यादौ तादृशव्युत्पत्तिभंगः॥ एवं च एकघटादिव्यक्तिमात्राधिकरणपरस्यात्र घटौ स्त इत्यादिवाक्यस्याप्रामाण्यं स्क घटमेव॥ उद्देश्यतावच्छेदकीभूतघटमात्रवृत्तिद्वित्वे
व्यापकतायास्तादृशवाक्यप्रतिपाद्याया विधेयसंसर्गे बाधादिति तदपि तुच्छम्॥ अत्र घटौ स्त इत्यादौ द्वित्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य द्वि
त्वे च घटनिष्ठाभावप्रतियोगितानवच्छेदकत्वस्य च तदधिकरणावृत्ति घटादिनिष्ठाभावप्रतियोगितावच्छेदकीभूते तत्त्वे विधेयसंसर्गे बाधात् घटद्वयाधिकरण
परतादृशवाक्याप्रामाण्यापत्तेः॥ तत्र द्वित्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य उक्तविधेयसंसर्गे भानोपगमस्थले न संभवति तत्तद्वित्वत्वेनानु
पस्थितेः॥ न च तदवच्छिन्नस्य संसर्गतया भाने तेन रूपेणोपस्थितिर्नापेक्ष्यते इति वाच्यं। तत्संसर्गावच्छिन्नतत्प्रकारतानिरूपिततद्विशेष्यताशालिशाब्दबोधपरमित्या

व्यु० वा० कारकतात्पर्यज्ञाने संसर्गस्य विशेषणतया तज्ज्ञाननिर्वाहाय संसर्गघटकार्थोपस्थितेरपि शाब्दबोधात्प्रागावश्यकत्वात्॥ प्रकृतसंसर्गेणैकपदार्थविशिष्टाप
रपदार्थबोधपरत्वज्ञानस्य प्रकृतवाक्यार्थविषयकतया प्रागसंभवेन उपदर्शिततात्पर्यज्ञानस्यैव शाब्दधीहेतुत्वोपगमात्॥ एवं वाक्यार्थघटकसंसर्गस्याननु
गमेन न अत्र घटौ स्तः इत्यादौ वाक्यभेदप्रसंगाच्च। अत्रोच्यते॥ व्यासज्यवृत्तिधर्मावच्छिन्नोद्देश्यताकशाब्दबुद्धौ तद्व्याप्यतादृशधर्मवत्त्वमपि विधेयसंसर्गतया
२३ भासते इति व्युत्पत्तिः॥ व्याप्यत्वं च तद्वदन्यावृत्तित्वं व्यतिरेकिविधेयकस्थले॥ तादृशधर्मवत्त्वं उद्देश्यतावच्छेदकताघटकसंबंधेन बोध्यं। अत्र घटौ स्तः इत्यादौ एत
द्देशवर्तमानत्वादिरूपविधेयस्य तद्वदन्यावृत्तित्वरूपव्याप्तिमच्चैतद्देशस्यैकघटादिव्यक्तिमात्राधिकरणत्वे घटपयादिनिष्ठद्वित्वमेव घटत्वव्याप्यपर्याप्तिरू
पोद्देश्यतावच्छेदकताघटकसंबंधावच्छिन्नतद्वत्त्वं च घटादौ बाधितमिति तादृशवाक्यस्याप्रामाण्यम्॥ अधिकरणस्य घटद्वयादिमत्त्वे च घटत्वादिव्याप्यद्वित्व
मेव तथेति घटत्वादिव्याप्यपर्याप्तिसंबंधेन तद्वत्त्वं घटादावबाधितमिति तादृशवाक्यस्य प्रामाण्यनिर्वाहः॥ केवलान्वयिविधेयकस्थले च द्वित्वत्वाद्यवच्छिन्न
व्यापकत्वमेव संसर्गघटकं केवलान्वयिनि तादृशव्यापकताया अप्युक्षणत्वात्॥ न तु तत्र द्वित्वत्वाद्यवच्छिन्नव्यापकत्वमिति न पूर्वोक्तदोषावकाशः॥ घटावानयति चै २३
त्र इत्यादौ चैत्रकर्तृकानयनकर्मतादिव्याप्यद्वित्वादिसमनिष्ठनिरूपकताकाधेयत्वादिसंबंधेन कर्मत्वादौ घटादेरन्वयो व्युत्पन्नः॥ तेन चैत्रस्यैकघटादिव्य
क्तिमात्रानयनकर्तृत्वे न तादृशप्रयोगः॥ द्वित्वादिमत्त्वे च प्रकारतावच्छेदकीभूतघटत्वादिव्याप्यपर्याप्तिसंबंधेन बोध्यं॥ तेन चैत्रस्य पटादिसहितैकघटादि
व्यक्त्यानयनकर्तृत्वेपि न तादृशप्रयोगः॥ एवमन्यत्राप्यूहनीयम्॥ यत्रानेकवृत्तिधर्मो द्वित्वान्वयितावच्छेदकतया भासते तत्रोभयादिनैव समं पदार्थान्तरा

द्विः अ

न्वयः।यत्रैकमात्रवृत्तिस्तथा तत्रैकेनापीति व्युत्पत्तिभेदावलंबनात् कार्यकारणभाववैचित्र्याच्च सर्वं समंजसं इत्यपि वदंति॥ अथ घटादिव्यक्तिभेदेनानयनक्र
मेणाभिन्नभिन्नैवेति प्रतिसंधातस्य पुंसो घटयोरानयनप्रतीतिवाक्यात् शाब्दबोधानुपपत्तिः॥ तस्य कर्मतात्वावच्छेदेनाधेयतासंसर्गावच्छिन्नप्रतियोगिताकस्य द्वित्वाद्य
वच्छिन्नघटाद्यभावस्य निश्चयसंभवात्॥ तस्य द्वित्वादिनाताद्दशसंसर्गेकधर्म्यादिविशिष्टधीविरोधित्वात् इति चेन्न॥ उभयत्वावच्छिन्नाभावबुद्धौ ज्ञानमुभयत्वाव
ग॥ च्छिन्नाधेयत्वनिरूपिताधेयतासंसर्गावगाहि ज्ञानमेव प्रतिबध्नाति॥ न तु केवलं विशेष्ये विशेषणमिति रीत्या जायमानमुभयत्वादिनाऽभावादिविशिष्टज्ञानं अतो
विशेषदर्शिनां ताद्दशवाक्यादाधेयतांशे उभयत्वाद्यवच्छिन्ननिरूपितत्वावगाहि भ्रमात्मकज्ञानं न भवत्येव। अपि तु तदंशे तदनवगाहि प्रमात्मकं ज्ञानमि
ति॥ उभयत्वावच्छिन्ननिरूपिताधेयत्वं च उभयादिवृत्तावेकस्मिन्धर्म एव न तु प्रत्येकमात्रवृत्ताविति कर्मतांशे ताद्दशाधेयत्वावगाहिज्ञानस्य प्रमत्वमित्य
वधेयम्॥ संख्याश्च प्रकृत्यर्थतावच्छेदकगताः क्वचित्तृतीयंते यथा संपन्नो व्रीहिर्यवावित्यादौ एतत्तत्वं प्रागेवाभिहितं विरुद्धसंख्यावच्छिन्नवाचकश
तादिपदोत्तरविभक्त्युपस्थाप्याच्च संख्याप्रकृत्यर्थतावच्छेदकसंख्यायामेवान्वेति॥ यथा शतमेकं द्वे शते त्रीणि शतानीत्यत्र शतत्वादावेकत्वद्वित्वबहुत्वाना
मन्वयः॥ अत एव चैकशतद्विशततात्पर्येण न शतानीति प्रयोगः॥ तत्र प्रकृत्यर्थस्य शतस्य बहुत्वान्वययोग्यत्वेपि प्रकृत्यर्थतावच्छेदकशतत्वांशे बहुत्वा
न्वये एव बहुवचनस्य साकांक्षत्वात्तत्र च योग्यताविरहात्। न चैकशतेपि नानापुरुषीयापेक्षाबुद्धिजन्यनानाशतत्वसंभवात् एकविधशतनि
ष्ठशतत्वेपि बहुत्वान्वययोग्यतास्त्वेवेति वाच्यम्॥ परस्परसमानाधिकरणद्वयावृत्तिबहुत्वस्यैव शतादिपदोत्तरबहुवचनार्थत्वात्॥ ताद्दश

43

व्यु॰ वा॰ बहुत्वस्य च एकशतादिदृष्टिन्यायात् शतमित्यादौ बाधात् ॥ अथ वा तत्रापि बहुत्वमेव बहुवचनार्थः ॥ परस्परसमानाधिकरणद्वयावृत्तिपर्याप्तिरेवाकांक्षानिरूपकः सं-
बन्धः ॥ यत्तु द्वे शते त्रीणि शतानीत्यादौ संख्येयशतादिशब्दार्थः ॥ ननु संख्येयं यस्य तदर्थत्वे विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोरित्यनुशासनविरो-
धात् द्विवचनादिसाधुतानुपपत्तेः ॥ गवां शतानीत्यादौ षष्ठ्यर्थान्वयानुपपत्तेश्च ॥ न चाभेदः षष्ठ्यर्थः तथा सति ब्राह्मणा दश इत्यत्र ब्राह्मणानां दश इत्यपि
२२ स्यात् अस्माकं चादशतः संख्याः संख्येये वर्तते अतः परं संख्याने संख्येये चेत्यनुशासनात् दशादिशब्दानां शतादिशब्दवत् संख्यानार्थकत्वाभावात् शतादि-
संख्यायाः पदार्थतावच्छेदकत्वेन तत्र षष्ठ्यर्थसंबन्धान्वयासंभवेन न तथा प्रयोग इति तदसत् ॥ गवां शतानीत्यादौ संख्यायाः प्राधान्येन शतादिशब्दवाच्यत्वे
गवां शतं दद्यादित्यादौ शतादिपदार्थस्य संख्यायाः दानादिकर्मत्वान्वयायोग्यतया प्रामाण्यानुपपत्तिः ॥ गवां शतं शुक्लमित्यादौ संख्यायां शुक्लाद्यभेदान्वययो-
ग्यताविरहात् तदनुपपत्तिश्च ॥ तस्माद् दशादिशब्दा इव शतादिशब्दा अपि संख्यावच्छिन्नवाचका एव न तु धर्मिविशेषणतानापन्नसंख्यावाचकाः ॥ स्वार्थैकदेशेऽपि संख्या-
यां स्वप्रकृतिविभक्त्यर्थसंख्यान्वयसाकांक्षतया अन्यप्रकृतिकषष्ठ्यर्थसंबन्धान्वयसाकांक्षतया च तेषां संख्यानार्थकताप्रवादः ॥ ननु दशादिशब्दानां तथात्वं २२
दशादिब्राह्मणतात्पर्येण ब्राह्मणानां दशेत्यादिप्रयोगविरहादिति तेषां संख्येयमात्रवाचितामवाद इति विंशत्याद्याः सदैकत्वे संख्याः संख्येयसंख्ययोः संख्या-
यां द्वित्वबहुत्वे स्त इत्यनुशासनेनैवोक्तार्थे तात्पर्यग्राहकं ॥ एकद्विबहुशब्दोत्तरं एकवचनद्विवचनबहुवचनानि च न संख्याबोधकानि उद्देश्यतावच्छेदकविधेय-
योरैक्येन एकत्वान्वये आकांक्षाविरहादिति तदुत्तरं प्रथमाविभक्तिः प्रयोगसाधुतामात्राय नित्यबहुवचनान्तादारादिशब्दपरं प्रथमाबहुवचनमपि कंचिन्नि

44

रर्थकं एव। यत्रैकव्यक्तिमात्रतात्पर्येण तादृशशब्दः प्रयुज्यते तत्र बहुत्वान्वययोग्यताविरहात्। ननु तद्गतगुणादिसाधारणबहुत्वस्य तत्रान्वय इति न शोभनम्। प्रकृत्यर्थतावच्छेदकव्याप्यपर्याप्तिसंबंधेनैकानेकवृत्तिसंख्यान्वयस्य व्युत्पन्नतया तादृशसंबंधेन तथाविधबहुत्वान्वये योग्यताविरहात्॥ अन्यथा उदासीनघटपटादिसाधारणबहुत्वस्याप्यन्वयसंभवेन तद्गतगुणादिसाधारणबहुत्वानुधावनस्याकिंचित्करत्वात्। अथ जहत्स्वार्थलक्षणया गुणादिसाधारणधर्मावच्छिन्नमेव प्रकृत्यर्थ इति चेत् तर्हि बहुत्वेन भासमानेषु गुणादिष्वपि पदार्थांतरान्वयः स्यात्। तथा च आपो द्रव्याणि दारा अत्र गृहे संतीत्यादिवाक्यानामप्रामाण्यतापत्तिः॥ गुणादिषु द्रव्यत्वगृहत्वसत्त्वादेर्बाधात् मुख्यार्थमात्रपरतादृशशब्दानां बहुत्वं च नाततानुपपत्तेश्चेति न किंचिदेतत्॥ अबादिपदार्थे एकत्वाद्वित्वान्वययोग्यतासत्त्वेऽपि साधुत्वार्थं तदुत्तरमेकवचनं न प्रयुज्यत इति ध्येयम्॥ आख्यातैकवचनस्य संख्यार्थत्वेऽपि विवदंते निष्कर्षानुसारिणः॥ घयेस्तीत्यादौ एकवचनादेव संख्याबोधसंभवात्॥ चैत्रेण दृष्टो घट इत्यादिस्थलानुरोधेन तस्य तद्बोधकतायाः आवश्यकत्वात्। न चैकवचनत्वेनानुगतेनैकत्वशक्तत्वादिति चैकवचनस्याप्येकत्ववाचकत्वमक्षतमिति वाच्यम्॥ एकवचनत्वस्यैकत्वशक्ततावच्छेदकतायाः प्रागेव निराकृतत्वात्॥ अस्तु वा तेन रूपेण तिङेकवचनस्याप्येकत्वे शक्तिः॥ तथापि तज्जन्यैकत्वोपस्थितेः शाब्दबोधोपयोगित्वे मानाभावः॥ न हि सामान्यत एकवचनज्ञानजन्यैकत्वोपस्थितित्वेन तच्छाब्दबोधहेतुतासंभवः॥ तथा सत्येकत्वे अगृहीतसुपदव्युत्पत्तिकस्य पुंसः सुपदश्रवणात् घटादिपदोपस्थाप्यघटादौ पटादिपदोत्तरसुबादिपदोपस्थाप्यैकत्वाद्यन्वयबोधप्रसंगः॥ किंतु सुपदत्वादिप्रकारकज्ञानजन्यतदुपस्थितित्वादिनैव तथा सति घटादिपदोत्तरसुपदत्वादिरूपानुपू

ख्यु॰ वा॰

वी विशेषरूपाकांक्षाज्ञानघटितत्वाद् घटादावेकत्वान्वयबोधस्य सामग्र्यां रूपदत्वादिप्रकारकधीजन्योपस्थितेरंतर्भावान्नोक्तदोषापत्तेरनवकाशात्। एवं च तिबा
दिपदत्वप्रकारकज्ञानजन्योपस्थितित्वेन सच्छाब्दबोधहेतुत्वे मानाभाव इति॥ यत्तु तिबादेः संख्यानभिधायकत्वे चैत्रः पचति तंडुलं चैत्रेण पच्यते तंडुल इत्यादौ
कर्तृकर्मवाचकपदात्तृतीयाद्वितीययोरापत्तिः॥ कर्तृकर्मसंख्याया अनभिधाने कर्तृकरणयोस्तृतीयेति कर्मणि द्वितीयेति सूत्राभ्यां तयोरनुशासनात् नैयायिक
२३ मतेक लकारस्य कर्तृकर्मावाचकत्वात्तदनभिधानस्य तृतीयाद्वितीयानियामकत्वासंभवात् न च कर्त्रादिगतसंख्यानभिधानमेव कथं कर्त्रादिवाचकपदोत्तरं तृतीया
दिनियामकं चैत्रेण पच्यते तंडुल इत्यादिस्थलेपि लकारस्य चैत्रादिगतसंख्याभिधायकत्वात्॥ एकत्वसंख्यादिबोधकत्वसामान्यस्यैवैकवचनाद्यभिधेयत्वादिति वा
च्यम्॥ अतस्तद्गतसंख्यानभिधायकत्वं प्रकृते न तद्गतसंख्यानिष्ठत्वस्य निरूपकत्वम्। अपि तु तद्विशेष्यकसंख्याप्रकारकशाब्दबोधाननुकूलत्वमेव। तथा च कर्त्रा
दिविशेष्यकसंख्यान्वयबोधाजनकलकारादिसमभिव्याहृतकर्त्रादिवाचकपदात्तृतीयादयो भवंतीत्यत्र तदनुशासनतात्पर्यं चैत्रेण पच्यते इत्यादौ चैत्रादिविशेष्यक
संख्यान्वयबोधकत्वं नाख्यातस्य आख्यातार्थभावनायामन्वयस्तद्विशेष्यकसंख्याबोधस्यैवाख्यातेन जननात् तादृशान्वये भावनाबोधे विशेष्यश्च प्रथमांतपदोप २३
स्थाप्य एव चैत्रः पचति तंडुलमित्यादौ चैत्रादिः साक्षादेव भावनाविशेष्यः॥ चैत्रेण पच्यते तंडुल इत्यादौ परंपरया चैत्रनिष्ठभावनाजन्यफलशाली तंडुल इत्याकार
कबोधस्य तत्रोदयात्॥ तस्मात्तिबादेरपि संख्याबोधकत्वमावश्यकमिति तत्त्वविचारसहम्॥ तथा हि कर्त्रादिनिष्ठसंख्यान्वयबोधाननुकूलत्वं। यदि तादृशबोधोप
धायकज्ञानविषयत्वाभावत्वं तत् तदा यादृशतिबादिज्ञानेन सहकार्यांतरविरहात्तादृशबोधो नाजनि तद्योगे तृतीयाद्यापत्तेः॥ यदि च तादृशबोधस्वरूपयोग्यज्ञानविषय

45

46

त्वाभावसत्त्वाय गादिसमभिव्याहृतात्मनेपदादिज्ञानस्यापि तादृशबोधस्वरूपयोग्यत्वात् ॥ तत्स्वरूपयोग्यताना विषयाख्यातस्येवासिद्धेः ॥ अथ कर्त्रादिविशेष्यक
संख्यान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयित्वानिरूपकत्वमेव तादृशबोधानुकूलत्वं चैत्रः पचतीत्यादिवाक्यघटकतिबादिविषयिता
चैत्रादिविशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्नजनकतावच्छेदिका ॥ तादृशान्वयबुद्धित्वावच्छिन्नं प्रति चैत्रादिपदसमभिव्याहृततिबादिपदज्ञानस्य हेतुत्वात् ॥ चै
त्रेण पच्यते तंडुल इत्यादिवाक्यघटकतादिपदविषयिता च न तादृशी चैत्रादिसमभिव्याहृततादृशज्ञानत्वेन तादृशान्वयबुद्धित्वावच्छिन्नं प्रत्यहेतुत्वात् ॥ न
चैत्रः पचते इत्यादौ चैत्रविशेष्यकाख्यातार्थसंख्यान्वयबोधोत्पत्त्या चैत्रसमभिव्याहृततादिपदज्ञानत्वेनापि तादृशान्वयबुद्धित्वावच्छिन्नं हेतुताक्षते वे
ति चैत्रेण पच्यते इत्यादिवाक्यघटकीभूततादृशादिविषयितापि तादृश्येवेति वाच्यम् ॥ चैत्रेण पचते चैत्रः पच्यते इत्यादिवाक्यात् चैत्रादिविशेष्यकस्य भाव
नायाः संख्यायाश्चान्वयस्य बोधस्यानुदयात् ॥ तद्विशेष्यकतदुभयान्वयबोधे प्रथमान्तचैत्रादिपदसमभिव्याहृततिशबादिविकरणान्तरतत्तदाख्यातपद
ज्ञानत्वेन हेतुत्वात् ॥ चैत्रेण पच्यते तंडुल इत्यादिवाक्यघटकतादीनां तादृशसमभिव्याहारादिविरहेण तया तद्विषयिताया अतादृशत्वात् ॥ चैत्रः पक्ष्य
ते इत्यादितः तंडुलः पक्ष्यते इत्यादितश्च चैत्रतंडुलविशेष्यकसंख्यान्वयबोधोत्पत्त्या चैत्रः पक्ष्यते तंडुल इत्यत्र उभयविशेष्यकसंख्यान्वयबोधौपयिकसमभिव्या
हारज्ञानविषयितायाः ते इत्यादौ सत्त्वेन कर्तृकर्मणोस्तृतीयाद्वितीययोरप्रसक्त्यापत्तितादृशवाक्यव्युत्पन्नानां प्रयुंजते ॥ कर्तरि साक्षात्कर्मणि च दर्शितप्र
परयाद्युपगमपक्षे यता विशेषणकान्वयबोधजनकताया आख्यातस्याव्युत्पन्नतया तादृशवाक्यादुभयविशेष्यकान्वयबोधासंभवात् ॥ न चाकांक्षाया

चैत्रे

व्यु० वा० ग्यत्वादिसत्वात्कथं न तादृशान्वयबोध इति वाच्यम्॥ अगत्या एकविधान्वयबोधे अन्यविधान्वयबोधसामग्र्यास्तदुत्कटतात्पर्यज्ञानस्य वा प्रतिबंधकत्वोपग
मात्॥ न च तंडुलः पक्ष्यते चैत्रेण तंडुलं पक्ष्यते इत्यादिवाक्यद्वयविषयकसमूहालंबनदशायामुभयविधान्वयबोधानुपपत्तिरिति वाच्यम् तादृशैक
विधान्वयबोधे तादृशान्यविधान्वयबोधपरत्वेनागृह्यमाणतत्पाविधाख्यातधर्मिकमुक्तान्वयबोधपरत्वज्ञानस्य हेतुतया चैत्रः पक्ष्यते तंडुल इत्यादिवाक्या
२४ त्तादृशौविधान्वयबोधवारणस्य दर्शितवाक्यानुपपादनस्य चाशक्यत्वात्॥ न च निरुक्तसंख्यानभिधानस्य तृतीयाद्वितीयानियामकत्वे चैत्रेण स्वं दृश्यते चै
द्वि त्रः स्वं पश्यतीत्यादौ तृतीयाद्वितीययोरनुपपत्तिः॥ कर्त्रादिविशेष्यकान्वयबोधौपयिकाकांक्षाशालीयविषयत्वनिरूपकत्वस्य तत्राख्याते सत्वादिति वाच्यम्॥
कर्मादिपरयत्पदाख्यातपदयोः समभिव्याहारः संख्यान्वयबुद्धित्वावच्छिन्नप्रयोजकविषयतानिरूपकस्तत्पदोत्तरतृतीयादिविभक्तिरित्येव नियमोप
गमे न प्रथमस्थले चैत्रपरस्वपदाख्यातपदयोर्द्वितीये च तत्स्वचैत्रपदाख्यातपदयोः समभिव्याहारस्यैव तद्विशेष्यकसंख्यान्वयबोधप्रयोजकतया क्र
मेण चैत्रपदस्वपदाभ्यां तृतीयाद्वितीययोरनुपपत्त्यनवकाशादिति चेन्न॥ अनभिहित इत्यधिकारे कर्तृकर्मणोस्तृतीयाद्यनुशासनस्य किं प्रयोजनमि
ति वक्तव्यम् चैत्रः पचति तंडुलः पच्यते इत्यादौ चैत्रतंडुलपदाभ्यां तृतीयाद्वितीययोरप्रयोग इति चेत् तत्किमणिमंत्रादिन्यायेन तादृशानुशासनस्य तत
थाविधप्रयोगविरोधितायेन तदभावः तत्प्रयुक्तः स्यात्॥ न चैवं संभवति॥ पचति पच्यते इत्यादिक्रियायोगे कर्तृकर्मवाचकपदानंतरं तृतीयाद्वितीययोर
साधुत्वस्य तत्कर्तृत्वतत्कर्मत्वादिबोधौपयिकाकांक्षारहितत्वादिरूपस्य प्रतिपत्तिः प्रयोजनं तस्येति चेन्न हि उक्तनियमपरतयापि न तल्लाभः॥ प्रथमा

त् चैत्रतंदुलादिपदतत्तदाख्यातपदयोः समभिव्याहारस्यैव चैत्रतंदुलादिविशेष्यकतत्तदाख्यातार्थसंख्यान्वयबोधप्रयोजकत्वमा चैत्रेण पचति तंदुलं पच्य
ते इत्यादिवाक्यघटकचैत्रतंदुलादिपदतिबादिपदयोः समभिव्याहारस्य तथात्वेन तद्घटकतृतीयाद्वितीययोः साधुत्वस्योक्तनियमाव्यवच्छेद्यत्वात्।। तस्मा
न्मुख्यभाक्साधारणकर्तृत्वकर्मत्वयोः कर्तृकर्मवाचकपदसमभिव्याहृतत्वरूपकृत्तद्धितसमासैरनभिधानमेव तत्तृतीयाद्वितीयादिनियामकं शिरोमणिभिर
त्रैव निर्भरो विहितः।। लादीनां तदनभिधायकत्वं चेन्न तद्वाचकत्वं तन्निष्ठत्वनिरूपकत्वं वा।। आख्यातसामान्यस्यापि आख्यातत्वेन तत्त्वादिना वा कर्तृ
त्वादिनिष्ठशक्तिलक्षणान्यतररूपकत्वात्।। कर्तृत्वानभिधायकाख्यातस्यैवाप्रसिद्धेस्तत्शाब्दबोधौपयिकाकांक्षाविरहान्यत्वमेव तत्। चैत्रेण पच्यते तंदुल इत्या
दावाख्यातस्य कर्तृत्वादिवाचकत्वेपि तच्छाब्दबोधप्रयोजकाकांक्षाराहित्यं तत्राक्षतमेव।। चैत्रादिपदोत्तरतृतीययैव कर्तृत्वादिबोधनसंभवात्। तत्र
तादृशाकांक्षाया जनकत्वमनाहित्यपि न।। चैत्रेण पक्ष्यते इत्यादौ तृतीयानुपपत्तेः।। पक्ष्यते चैत्र इत्यतः चैत्रादौ पाककृतेः केवलात्पक्ष्यते इत्यादितश्च मुख्य
विशेष्यतया तस्य बोधात्तादृशाख्यातधात्वोरानुपूर्वीविशेषरूपाकांक्षायाः कृतिबोधौपयिकत्वात्।। न च समभिव्याहाररूपाकांक्षैव विशेषणीया।। प्रकृ
तिप्रत्यययोः आनुपूर्वीआकांक्षा न तु समभिव्याहार इति नोक्तदोष इति वाच्यम्।। तथा सति चैत्रेण पचतीत्यादावपि तृतीयायाः साधुतापत्तेः।। तादृशचैत्र
पदाख्यातपदयोः समभिव्याहारस्य कृतिबोधानौपयिकत्वात् चैत्रेण विजेष्यते मैत्र इत्यादौ तृतीयानुपपत्तेश्च। विजेष्यते मैत्र इत्यादितः कृतिबोधात्तादृ
शाख्यातमैत्रपदयोः समभिव्याहारस्य कृतिबोधौपयिकत्वात् किंतु तात्पर्यविरहान्यत्वमेव। तथा च चैत्रेण पक्ष्यते इत्यादावाख्यातस्य कर्तृत्वादि

49

व्यु०व्या० तात्पर्यकत्वेतृतीया असाधुरेव ।। चैत्रेणपचतीत्यादौ आख्यातस्यार्थाविवक्षायांतृतीयायाः साधुत्वेपिपरस्मैपदस्य असाधुत्वा न प्रयोगः ।। परस्मैप
दस्यअसाधुत्वेचधात्वर्थविशेष्यस्यप्रत्ययेनअविवक्षणेभावकर्मणोरितिसूत्रेणात्मनेपदनियमात् आख्यातार्थाविवक्षायांतु चैत्रेणपचतेइत्या
दिप्रयोगः शबादिविकरणस्यऽसाधुत्वात् ।। कर्तृत्वतात्पर्यकसार्वधातुकयोगेएवतत्सत्वात् ।। कर्तृकर्मकत्वोभयतात्पर्येण चैत्रः पक्ष्यतेतंडुलइत्यादस्य
स्कनप्रयोगः ।। तदेकतरबोधे अन्यपरत्वेनागृह्यमाणाख्यातधर्मिकप्रकृतान्वयबोधपरत्वज्ञानस्यहेतुत्वात् । चैत्रेणपक्ष्यतेतंडुलइत्यादौकर्तृत्वास्यवाख्या
तस्यतात्पर्येप्येकर्मत्वाद्यन्वयबोधोपिनभवत्येव ।। अथपक्त्वानिभुंक्तेचैत्रः ओदनः पक्त्वाभुज्यतेइत्यादौक्त्वाक्रमेणकर्तृकर्मत्वानभिधानाच्चैत्रपदौदन
पदाद्युत्तरंतृतीयाद्वितीयेकथंनस्याताम् ।। नचक्त्वानभिधानेपिआख्यातेनतदभिधानान्नानभिहितत्वं समभिव्याहृतपदाभिहितत्वसामान्याभावस्यैवा
नभिहितपदेनविवक्षणात् समभिव्याहृतेतिकरणाच्चैत्रेणगम्यतेग्रामस्तंमैत्रोगच्छतीत्यादौनतृतीयाद्वितीययोरनुपपत्तिः ।। गच्छतिगम्यतेइत्याद्या
ख्यातस्य तत्पदाघसमभिव्याहृतत्वादितिवाच्यम् ।। तथासतिभुंजानेनचैत्रेणपच्यतेभोक्तव्यमोदनंपचतीत्यादौतृतीयाद्वितीययोरनुपपत्तिः ।। क्त
ताकर्तृत्वकर्मत्वयोरभिधानात् कृतात्रभोजनकर्तृत्वतत्कर्मत्वयोरभिधानेपिपाककर्तृत्वंतत्कर्मत्वंचानभिहितमितिचेन्नर्हिप्रकृतेपितदनभिहि २५
तमेव ।। नचप्रधानक्रियानिरूपितकर्तृत्वाद्यनभिधानेतृतीयादेःसाधुत्वमित्युक्तम् प्रधानशक्त्यभिधानेगुणशक्तिरभिहितवत्प्रकाशतइतिश
क्तिः कर्तृत्वादिरितिवाच्यम् ।। तथापिचैत्रेणदृश्यमानंघटंमैत्रः पश्यतीत्यादौज्ञानभेदेनविषयताभेदाभावात् चैत्रदर्शनमैत्रदर्शनोभयनिरूपितवि

K K S U LIBRARY
RAMTEK
441 106
M-1735
Dist. Nagpur

50

```
[OrderDescription]
,CREATED=05.10.20 12:51
,TRANSFERRED=2020/10/05 at 12:58:15
,PAGES=50
,TYPE=STD
,NAME=S0003855
,Book Name=M-1735-VYUTAPTIVAD
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,
```